

कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः


Checked 2012
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M 648 विषय पूजाविधी
नाव. प्रयोगरत्न MSS
लेखक/लिपीकार काशीनाथ सदाशिव दीक्षित कृत.
पृष्ठ 69 काळ – पूर्ण/अपूर्ण

प्र·ग·त्र

॥श्रीगणेशायनमः॥श्रीमत्सरस्सुहस्तायभोगिभोगांगदायच॥अतिसिंदूरवर्णायगणानांपतयेन
मः॥१॥यस्मिन्प्रसन्नेकिलनिर्गुणोपिवचोविकाशंलभतेचिरेण॥तंज्ञानरूपंगिरिजार्द्धदेहंशिवंशिवां
चैवनमामिनित्यं॥२॥ग्रंथेस्मिन्गुणगणपाक्षमुच्यतेमस्तग्रंथंगुणगणवंतमहाकेन॥तस्तैतःशिरसिकृ
तांजलिस्तयात्रेशोध्यंतःसद्दसद्दिहोच्यतेमयायत्॥३॥अथसंस्काराः॥तेचाष्टाचत्वारिंशत्॥तथा
चगोतमः॥गर्भाधानंपुंसवनंसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनंचत्वारिवेद
व्रतानिस्नानंसहधर्मचारिणासंयोगःपंचानांयज्ञानामनुष्ठानमष्टकापार्वणश्राद्धंश्रावण्याग्रहाय
णीचैत्रीआश्वयुजीतिसप्तपाकसंस्थाअग्न्याधायमग्निहोत्रंदर्शपौर्णमासौचातुर्मास्यान्याग्रय
णेष्टिनिरूढपशुःसौत्रामणीतिसप्तहविर्यज्ञसंस्थाअग्निष्टोमात्यग्निष्टोमउक्थ्यःषोडशीवाजपे
योतिरात्रोप्तोर्यामइतिसप्तसोमयज्ञसंस्थाइत्येतेचत्वारिंशत्संस्काराःअष्टावात्मगुणाःदयासर्व
भूतेषुक्षांतिरनसूयाशौचमनायासोमांगल्यमकार्पण्यमस्पृहेतियस्यैतेचत्वारिंशत्संस्का
राअष्टावात्मगुणाश्चसब्रह्मणःसायुज्यमाप्नोतीति॥पार्वणःपर्वस्थालीपाकःश्राद्धममावास्यादि॥
श्रावणीतत्रकर्तव्यंश्रवणाकर्म आग्रहायणीतत्रकर्तव्यं॥प्रत्यवरोहणं॥चैत्रीतत्रकर्तव्यःशूले

गवःआश्वयुजीतत्रकर्तव्यमाश्वयुजीकर्मेतिहरदत्तोव्याख्यौ॥अंगिरसातुपंचविंशतिसंस्कारा
उक्ताः॥पंचविंशतिसंस्कारैःसंस्कृतायेद्विजातयः॥तेपवित्राश्चयोग्याःस्युःश्राद्धादिषुसुयं
त्रिताः॥आदिशब्दाद्यजनादौ॥गर्भाधानंपुंसवनंसीमंतोबलिरेवच॥बलिर्विष्णुबलिः॥जातक
र्मसंनामकर्मनिष्क्रमोन्नाशनंपरं॥चौलकर्मोपनयनंतद्व्रतानांचतुष्टयं॥तद्व्रतेनप्रसिद्धव्रताद्वे
दग्रहणेतद्व्रतानांवेदव्रतानामित्यर्थः॥स्नानोद्वाहौचाग्रयणमष्टकाचयथातथं॥श्रावण्यामा
श्वयुज्यांचमार्गशीर्ष्यांचपार्वणं॥उत्सर्गश्चाप्युपाकर्ममहायज्ञाश्चनित्यशः॥संस्कारानियतास्त्वेते
ब्राह्मणस्यविशेषतइति॥श्रावण्यांश्रवणाकर्मादीत्यादिपूर्ववद्व्याख्येयं॥नित्यतानित्याः॥एते
षांपंचविंशतिनांनैमित्तिकवार्षिकमासिकनित्यभेदेनचातुर्विध्यमाहाश्वलायनः॥नैमित्तिकाःशो
डषोक्ताःसंसुद्वाहावसानकाः॥सत्येवाग्रयणाद्याश्चसंस्कारावार्षिकामताः॥मासिकंपार्वणंप्रो
क्तंमहायज्ञानांतुवार्षिकं॥महायज्ञास्तुनित्याःस्युःसंध्यावच्चाग्निहोत्रवत्॥इति॥अत्रगर्भाधा
नाद्याउपनयनांताएवसर्वेषांनियताः॥नतुस्नाताद्याः॥तेनब्रह्मचर्यादेवप्रव्रजेदित्यादिनविरु
ध्यते॥एतेचद्विजानामेवसमंत्रकाः॥यदाहयाज्ञवल्क्यः॥ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्या

स्त्रयोद्विजाः॥निषेकाद्याः श्मशानांतास्तेषां वै मंत्रितक्रियाः इति चैवं॥अत्र तेषामेव मंत्रतः॥क्रिया
इति यद्वनश्लद्रस्यामंत्रिकाः॥क्रिया इति सूचयति॥अत एव संस्कारानधिकृत्य यमः॥शूद्रोप्ये
वंविधः कार्यो विनामंत्रेण संस्कृतेति संस्काराः॥इति संस्काराः॥अथ स्वस्तिवाचनं तद्यत्र कर्तव्यं
तदुच्यते॥व्यासः॥संपूज्य गंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्॥धर्मकर्मणि मांगल्ये संग्रा
मेद्भुतदर्शने॥गृह्यपरिशिष्टे॥अथ स्वस्तिवाचयनमृद्धिकृद्विविवाहांता अपत्यसंस्काराः॥
प्रतिष्ठोद्यापने पूर्ते तत्कर्मणश्चाद्यंतयोः कुर्यादिति॥आश्वलायनस्मृतेः॥वैदिके तांत्रिके चाहो
ततः पुण्याहमीष्यते॥शौनकः॥पुण्याहवचनविधिं वक्ष्यामोथ यथाविधि॥प्रयोगतु॥कर्मणा
मादावंते चोदयसिद्ध्येति॥तच्च कर्मप्रयोगांतर्गतमिति केचित्॥बह्वृचस्तु प्रयोगबहिर्भूत
मिति॥आद्यपक्षे कर्मप्रयोगसंकल्पं कृत्वा कार्यं द्वितीये तु तत्कृत्वा कर्मसंकल्पः॥अथ प्रयो
गः॥हेमाद्रौ दानकांडे बह्वृचगृह्यपरिशिष्टोक्तस्येनोक्तः संकल्पसाधारणशिष्टाचारप्राप्तश्च पुण्या
हवाचनप्रयोगः कृतमंगलस्नानः स्वलंकृतः कृताचमनः प्राङ्मुखो यजमानोनस्याद्धादिति पीठोप
विश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुपवेश्य संस्कार्यं च तथैवोपवेश्य॥ॐ सुमुखश्चैकदंतश्च

स्वादिशुक्लांबरधरं अभीप्सितार्थ सर्वमंगलमंगल्ये सर्वदा सर्वकार्येषु सर्वकालेषु समस्तदे
शेषु तदेव लग्नं यत्र योगीश्वरः कृष्णः सर्वेष्वारंभकार्येषु इति श्लोकान्पठित्वा श्रीमन्महागण
पतये नमः लक्ष्मीनारायणाभ्यां नमः उमामहेश्वराभ्यां नमः शचीपुरंदराभ्यां नमः मातापितृभ्यां
नमः इष्टदेवताभ्यो नमः कुलदेवताभ्यो नमः सर्वेभ्यो ब्राह्मणेभ्यो नमः॥आचमनं प्राणायामं कृ
त्वा देशकालौ संकीर्त्य अमुकफलसिद्ध्यर्थं श्वो द्यवामुककर्म करिष्ये॥तदंगतयादौ पुण्याहवा
चनादि करिष्ये इति संकल्प्य॥यदा तु प्रयोगाद्बहिर्भूतं पुण्याहवाचनाद्यंगतं तदामुकफलसिध्य
र्थममुककर्मकर्तुं मंगलतन्त्र तमादौ पुण्याहवाचनादि करिष्ये इति प्रत्येकं संकल्पः॥प्रधानसं
कल्पस्तु सर्वं कृत्वा तद्दिने एव श्वो वा कार्यः॥ततः स्वपुरतः महीद्यौरिति भूमिं स्पृष्ट्वा ओष
धयः समिति तंदुलपुंजं कृत्वा आजिघ्र कलशमिति पुंजोपरि सलक्षणं धातुमयं मृन्मयं वा
कलशं निधाय इमम्मे वरुण इति तीर्थजलेन पूरयित्वा गंधद्वारामिति गंधं निक्षिप्य चंदनादिना
तमनुलिप्य पुष्पमालाधूपितं कृत्वा पूर्णा दर्वीति तंदुलोपरि पूर्णपात्रं निदध्यात्॥या ओष
धीरिति सर्वौषधीः ओषधयः समिति यवान् कांडात्कांडादिति दूर्वाः अश्वत्थे व इति पंचपल्ल

वानूस्योनापृथ्वीतिपंचसप्तमन्दःयाः फलिनीरितिफलंपरिवाजपतिरितिपंचरत्नानिहि
रण्यगर्भइतिहिरण्यंयुवासुवासाइतिवस्त्रेणपरःऋसूत्रेणचवेष्टयेत्॥पूर्णादर्वीइतिधान्यं
पूर्णफलसहितेपात्रमुपरिनिदध्यात्॥ततःतत्वायामीतिशुनःशेपऋषिःत्रिष्टुप् वरुणोदेव
ताकलशेवरुणावाहनेविनियोगः॥ॐतत्वायामीतिकलशेवरुणमावाहयेत्॥गंधनादिना
पूजयेत्॥ततःकलशेदेवतावाहयेत्॥सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयां
तुयजमानस्यदुरितक्षयकारकाः॥कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥मूलेतत्र
स्थितोब्रह्मामध्येमातृगणाःस्मृताः॥कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजु
र्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीशां
तिःपुष्टिःकरीतथा॥आयांतुममशांत्यर्थंदुरितक्षयकारकाइति॥ततःकलशप्रार्थना॥
देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं॥त्वत्तोये
सर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥शिव
स्त्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयि

तिष्ठंतिसर्वेपियतःकामफलप्रदाः॥त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव॥सान्निध्यंकुरुमेदेवे
शप्रसन्नोभवसर्वदा॥अवनिकृतजानुमंडलःकमलमुकुलसदृशिमंजलींशिरस्याधायदक्षि
णेनपाणिनासुवर्णपूर्णकलशंधारयित्वा॥आशिषःप्रार्थयते॥प्रार्थनामहाएताःसत्याशिषःसं
तु॥दीर्घानागानघोगिरयस्त्रीणिविष्णुपदानिच॥तेनायुःप्रमाणेनपुण्यंपुण्याहंदीर्घमायुरस्तु॰
॥शिवाआपःसंतु॰सौमनस्यमस्तु॰अक्षतंचारिष्टंचास्तु॥गंधाःपांतु॰सुमंगल्यंचास्तु॰अक्षताःपांतु॰
आयुष्यमस्तु॰पुष्पाणिपांतु॰सौश्रियमस्तु॰तांबुलानिपांत्वैश्वर्यमस्तु॰दक्षिणाःपांतुबहुधे
यंचनोस्तु॰दीर्घमायुःशांतिःपुष्टिस्तुष्टिःश्रीयशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु॥
अत्रसर्वत्रब्राह्मणैरस्त्वितिप्रत्युत्तरंदेयं॥यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशो
भनाःप्रवर्त्ततेतमहमोंकारमादौकृत्वाऋग्यजुःसामाशीर्वचनंबहुऋषिमतंसमनुज्ञातंभव
द्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्येविप्राःवाच्यतामितिवदेयुः॥एवमुत्तरत्रापियथायोगं
प्रत्युत्तरं॥ततोयजमानःभद्रंकर्णेभिःऋक्॥द्रविणोदेवेतिऋक्॥सवितापश्चातेतिऋक्॥
नवोनवोभवतीतिऋक्॥उच्चादिवीतिऋक्॥आपउंदंतुजीवसेदीर्घायुत्वायवर्चसे॥यस्त्वा

प्र॰ग॰ल॰

धौतिरे

इन्द्राकीरिया मन्यमानो मर्त्यो जोहवीमि॥ जातवेदो यशो अस्मासु प्रजाभिरग्ने अमृतत्वम् श्यां॥ यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृणवः स्योनं॥ अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति॥ व्रतजपनियमतपस्वाध्यायक्रतुशमदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां॥ विप्राः समाहितमनसः स्मः॥ यजमानः प्रसीदंतु भवंतः॥ विप्राः प्रसन्नाः स्मः॥ यजमानः॥ शांतिरस्तु॰ पुष्टिरस्तु॰ तुष्टिरस्तु॰ वृद्धिरस्तु॰ अविघ्नमस्तु॰ आयुष्यमस्तु॰ आरोग्यमस्तु॰ शिवं कर्मास्तु॰ कर्मसमृद्धिरस्तु॰ धर्मसमृद्धिरस्तु॰ वेदसमृद्धिरस्तु॰ शास्त्रसमृद्धिरस्तु॰ पुत्रसमृद्धिरस्तु॰ धनधान्यसमृद्धिरस्तु॰ इष्टसंपदस्तु॰ ॥ बहिर्देशे॥ अरिष्टनिरसनमस्तु॰ यत्पापं तत्प्रतिहतमस्तु॰ यच्छ्रेयस्तदस्तु॰ उत्तरे कर्मण्यविघ्नमस्तु॰ उत्तरोत्तरमहरहरभिवृद्धिरस्तु॰ उत्तरोत्तराः क्रियाः शुभाः संपद्यंतां॰ तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॰ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रियंतां॰ तिथिकरणे मुहूर्ते सग्रहे सदैवते प्रियेतां॰ अग्निपुरोगा विश्वेदेवाः प्रीयंतां॰ इंद्रपुरोगा मरुद्गणाः प्रियंतां॰ ब्रह्मपुरोगाः सर्वे वेदाः प्रियंतां॰ माहेश्वरीपुरोगा उमामातरः प्रियंतां॰ वशिष्ठपुरोगा ऋषिगणाः प्रियंतां॰ अरुंधतीपुरोगाए

रह

सनम

दुर्गापांचाल्यौ प्रीयेतां

१ विष्णुपुरोगाः सर्वे देवाः प्रीयंतां॥१

२ भगवती पुष्टिकरी प्रियतां॥ भगवती तुष्टिकरी प्रियतां॥२

कपत्न्यः प्रियंतां॰ ऋषयश्छंदांस्याचार्या वेदा यज्ञाश्च प्रीयंतां॰ ब्रह्म च ब्राह्मणाश्च प्रियंतां॰ श्रीसरस्वत्यौ प्रियेतां॰ श्रद्धामेधे प्रियेतां॰ भगवती कात्यायनी प्रीयतां॰ भगवती वृद्धिकरी प्रियतां॰ भगवंतौ विघ्नविनायकौ प्रियेतां॰ भगवान्स्वामीमहासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयंतां॰ भगवान्हरिहरहिरण्यगर्भाः प्रीयंतां॰ सर्वाः कुलदेवताः प्रीयंतां॰ सर्वाः ग्रामदेवताः प्रीयंतां॰ ॥ बहिर्देशे॥ हताश्च ब्रह्मद्विषः हताश्च परिपंथिनः हताः कर्मणो विघ्नकर्तारः शत्रवः पराभवं यांतु॰ शाम्यंतु घोराणि॰ शाम्यंतु पापानि॰ शाम्यंत्वीतयः॥ शुभानि वर्द्धंतां शिवा आपः संतु॰ शिवा ऋतवः संतु॰ शिवा अग्नयः संतु॰ शिवा आहुतयः संतु॰ शिवा ओषधयः संतु॰ शिवा वनस्पतयः संतु॰ शिवा अतिथयः संतु॰ अहोरात्रे शिवे स्यातां॰ निकामेनिकामे नः॰ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रियंतां॰ भगवान्नारायणः प्रियंतां॰ भगवान्पर्जन्यः प्रियतां॰ भगवान्स्वामीमहासेनः प्रियतां॰ पुण्याहकालान्वाचयिष्ये॰ वाच्यतां॥ उद्गातेव पुण्यमावदत्याज्याया॰ पुण्याहमेव कुरुते॥ नो ब्राह्मणाः मम गृहे अस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु॥ इति स्वयं मंत्र स्वरेणोक्ता ब्राह्मणेः ॐ

२ भगवती माहेश्वरी प्रियताम्

स्त्री

अंतः ६

प्र·ग·रत्न

पुण्याहमितितयोक्ते न एवं मध्यमस्वरेणोक्ताः तथैव तेरुक्ते पुनरेवमुच्चैःस्वरेणोक्ते तैस्तथैव तेरुक्ते
स्वस्त्ययनं तु नः आह्रिय नमस्तं स्वस्ति· ब्राह्मणाइत्यादि कर्मणइत्यंतं पूर्ववत्॥ स्वस्तिं भवंतो ब्रुवंत्वि
ति त्रिः आयुष्मते स्वस्तिप्रतिवचनं त्रिः ऋध्याम· काममप्राः सर्वामृद्धिं प्रतितिष्ठति· ब्राह्मणामि
त्यादि· अस्य कर्मणः ऋद्धिं भवंतो ब्रुवंत्विति त्रिः ॐ ऋध्यतामिति प्रतिवचनं त्रिः श्रियेजातः
श्रीश्वते· मितद्रौ· श्रियएवौ· एवंवेद· ब्राह्मणामित्यादि अस्य कर्मणः श्रीरस्त्विति भवंतो ब्रु
वंत्विति त्रिः ब्रूयात्॥ अस्तु श्रीरिति विप्रास्त्रिः॥ ततः कर्तुर्यजमानः पत्नीमुपवेश्य पात्रपति
ततंडुलेन पल्लवदूर्वादिभिरुदग्नु स्वाविप्रारभिषिंचेयुस्तिष्ठंतः॥ तत्रमंत्राः॥ देवस्यत्वेत्यादि
सुरास्त्वामभिषिंचेत्यादि पौराणान्॥ श्लोकानपिपठंत्स अभिषेकः॥ ततनीराजनं कुर्यात्॥ आ
भ्युदयिकश्राद्धविधिः॥ तच्चगर्भाधानादिषु गर्भसंस्कारेषु जातकर्मादिषु बपत्यसंस्कारेषु अ
ग्न्याधानादिषु श्रौतकर्मसु आवसथ्यकर्मसु वापीकूपतडागारामादिषु घ्योपनादिषु देवप्रतिष्ठा
यां वानप्रस्थाश्रम संन्यासस्वीकारे तुलापुरुषादिमहादानादौ नवगृहप्रवेशे महान्यासादि
वेदव्रतेषु राज्याभिषेके शांतिकपौष्टिकेषु उपाकर्मोत्सर्जनयोरपेके नविनयो वानयोरन्यत्रा

प्येवंविधे कार्यं॥ इदमाभ्युदयिकश्राद्धं वक्ष्यमाणामातृपूजनं मेकस्थाने कसंस्कारे षोडकर्तृ
केषु युगपदुपस्थितेषु सर्वादौ सकृदेव तंत्रेण कार्यं न तु प्रतिसंस्कारमावृत्या॥ यथादैवाद
कृतजातकर्मादिकस्यापनयनकालेजातकर्माद्यनुष्ठाने देशांतरगतस्य मृतबुध्याकृ
तौर्ध्वदेहिकस्यागतस्य पुनर्जातकर्मादिसंस्काराणां विहितानां युगपदनुष्ठाने कर्मनाशा
जलस्पर्शादीनां प्रायश्चित्तनतया पुनः संस्काराणां युगपदनुष्ठानेवा॥ तदुक्तं ब्रह्मपुराणे॥ गणे
शक्रियमाणानां मातृणां पूजनं सकृत्॥ सकृदेव भवेच्छ्राद्धमादौ न पृथगादिति कात्यायनः॥
कुड्यलग्नावसोर्द्धारा पंचधारा घृतेन तु॥ कारयेत्सप्त वा धारा नातिनीचा नचोच्छ्रिताः॥ गौ
री पद्मा शची मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टि
स्तथा तुष्टिरात्मनः कुलदेवता॥ गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश॥ आयुष्याणि च शां
त्यर्थं जपेद्दत्त्वसमाहितः॥ आयुष्याणि॥ आनोभद्रा इत्यादीनि ततः वृद्धिश्राद्धं नवदैवतं सपार्वणं
चत्रयात्मकं॥ तत्र क्रममाह आश्वलायनाचार्यः॥ माता पितामही चैव संपूज्या प्रपितामही॥ पि
त्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः॥ एते नार्चयनीयास्युः पितावारोऽभ्युदयद्विजैरिति॥ यत्तु वृ

प्र॰ग॰त्त

वृद्धवसिष्ठः॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं॥ नाम संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकमि
ति॥ स्मृत्यर्थसारश्च॥ वृद्धमुख्यास्तु पितरो वृद्धश्राद्धेषु भुंजिते इति नच्छाखांतरविषयं॥ कात्याय
नानां तु आनुलोम्येन मात्रादिक्रमेणैव॥ कात्यायनाचार्यवचनात्॥ यत्तु ब्रह्मपुराणे॥ पिता पिता
महश्चैव तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः॥ तेभ्यः पूर्वे त्रयो ये
तु ते तु नांदीमुखाः स्मृताः इति तन्महालयप्रकरणपठितत्वात् तत्रोक्तपद्यपौर्णमासिनिमित्तकश्राद्ध
विषयं तत्प्रकरणपाठादित्येवं हेमाद्रौ स्पष्टं चिरं॥ इह च नांदीमुखसंज्ञका मात्रादित्रिवृद्धिरोत्॥
विष्णुपुराणे॥ कन्याविवाहादिषु तु क्रमान्नांदीमुखान्पितॄन् तान्दोन पर्यैत्प्रयोतो गृहीसुक्तेः॥ ब्र
ह्मपुराणे च जन्माद्यनुक्रमन्पितॄन्नांदीमुखान्नाम तर्पयेद्विधिपूर्वकमिति स्मृतेः॥ वृद्धपराशरेण
न तु देवा नाम पि नांदीमुखविशेषेणमुक्तमेव च॥ नांदीमुखेभ्यः देवेभ्यः प्रदक्षिणकुशासनमिति॥
वृद्धिश्राद्धं च कालः कर्माहात्पूर्वेद्युः मातृपार्वणं॥ कर्माहे पितृपार्वणं कर्मोत्तराहे मातामहपार्व
णमिति॥ अस्य संभवे पूर्वेद्युरेव पूर्वाह्णे मातृकं मध्याह्ने पैतृकं॥ अपराह्णे मातामहानां अ
स्याप्यसंभवे अहन्येव मनुः॥ अलाभे श्राद्धकालानां नांदीश्राद्धत्रयं बुधः॥ पूर्वेद्युरेव कुर्वीत पूर्वाह्

ह्णे मातृपूर्वकमिति॥ इदं च महत्सु कर्मसु॥ अल्पेषु तु कर्मादावेव श्राद्धं॥ पुत्रजन्मनि तु दिने वा रात्रौ
वा भुक्तवतोपवासिना वा॥ पुत्रजन्मांतरमेव कार्यं अत्र संकल्पादौ विशेषः संग्रहे॥ शुभाय प्रथमांते
न वृद्धौ संकल्पमाचरेत्॥ न षष्ठ्यावाय दिकुर्यान्मां दोषो भिजायते॥ अतस्य वृद्धशब्दा नाम रूपाणा
मगोत्रिणां॥ अनाम्नामतिलाद्येश्च नांदीश्राद्धं च सव्यवत्॥ आश्वलायनकारिकां च य संबंधतामरू
पाणि वर्जयेदत्र कर्मणि॥ इदं तु शाखांतरविषयं॥ अत्र॥ सत्यवसु विश्वेदेवा तत्स्थाने द्वौ विप्रौ मात्रा
दीनां च प्रत्येकं द्वौ द्वौ एवं विंशति ब्राह्मणाः॥ यद्वा मात्रादीनां त्रयाणां द्वौ द्वौ एवमष्टौ॥ अत्र नाम स
मेति लस्थाने यवा एव स्वधा स्थाने स्वाहा शब्दः॥ सव्यं जानुनी पितानावः प्राङ्मुख एव कुर्यात्॥
दक्षिणमुपचारो ऋजुदर्भैः क्रियेत सादयो विशेषा ग्रंथांतरतो ज्ञेयाः॥ पिंडदाने कुलदेशाचार
तो व्यवस्था न विष्णुपुराणे॥ पिंडनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप॥ वृद्धिश्राद्धे महाबाहो कु
लधर्मान वेक्ष्य तु॥ पिंडदानपक्षे विशेषो वशिष्ठेनोक्तः॥ दधिकर्कंधुसंमिश्रान्पिंडान्दद्याद्य
थाक्रमं॥ कर्कंधुर्बदरीफलं॥ तथा एकैकस्मिन्पिंडद्वयं देयं॥ एकनाम्नापरतूष्णीं दद्यात्पिंडद्व
यं बुध इति चतुर्विंशतिमतात्॥ अन्ये बहवो विशेषा ग्रंथांतरतो ज्ञेयाः॥ दाक्षिणात्यानां विस्त

प्र॰ग॰त्न

तत्र वृद्धिश्राद्धमानान्तेरोच्यते॥ अथाभ्युदयिके कर्तृनिर्णयः॥ सायणीये॥ नांदीश्राद्धं पिता कुर्या
दाद्ये पाणिग्रहे सुतः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं॥ द्वितीयपाणिग्रहादौ वर एव कुर्या
दित्यर्थः॥ कात्यायनः॥ स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु॥ पिंडानोद्वाहनात्तेषां तस्याभा
वे तु तत्क्रमात्॥ तेषां सुतानां मोद्वाहनात् अथम विवाहपर्यंतं पिता स्वपितृभ्यः पिंडान् तदुपलक्षि
तं वृद्धिश्राद्धं कुर्यात्॥ तस्यापि पितुरभावे तस्य संस्कार्यस्य पितृव्यादयः क्रमस्तेन क्रमेण पितृव्या
द्यर्यमातुलादिः श्राद्धं कुर्यात्॥ न स्वपितृभ्य इति हेमाद्रिणा व्याख्यातं॥ जीवपितृकस्तु पि
तुर्मात्रादिभ्यो वृद्धिश्राद्धं कुर्यात्॥ वृद्धो तीर्थे च संन्यस्ते ताते च पतिते सति॥ येभ्य एव पिता द
द्यात्तेभ्यो दद्यात्स्वयं सुतः॥ एतत्साग्निकविषयमित्येके॥ विष्णुः॥ पितरि जीवति यः श्राद्धं कुर्या
त्स येषां पिता कुर्यात्तेषां कुर्यात् स्थिते पि पितामहे च एषां प्रपितामहः पितरि पितामहे चैव द
द्यादिति॥ आश्वलायनगृह्यपरिशिष्टे तु॥ जीवत्पिता सुतसंस्कारेषु मातृमातामह्योः कुर्यात्॥
तस्यां जीवंत्यां मातामहस्यैव कुर्यादिति॥ अथास्य शिष्टप्रचुरार्चोपरिगृहीतः संकल्पविधिनां
प्रयोगः॥ उपनयनादिमहत्सु तत्कर्मसु पूर्वेद्युर्जातकर्मादिष्वल्पकर्मसु तद्दहरेव नांदीश्राद्धं कुर्यात्॥

तत्रादौ कर्त्ता कृतमांगलिकस्नानो धौतवासाः कृतस्वस्त्ययनो नांदीश्राद्धं पूर्वांगमातृकापूजनं
कुर्यात्॥ पूजाप्रकारस्तु॥ पूजोपकरणान्युपकल्प्य प्राङ्मुखोपविश्य कुशयवजलान्यादाय अद्ये
हेत्यादि अमुककर्मांगतया गणपतिसहितगौर्यादिचतुर्दशमातृकापूजनमहं करिष्ये॥ इति
संकल्प्याक्षतैः ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ॥ ॐ भूर्भुवः स्वः गौरि इहागच्छ इह तिष्ठ॥
एवं पद्मे॥ शची॥ मेधे॥ सावित्री॥ विजये॥ जये॥ देवसेने॥ स्वधे॥ स्वाहे॥ धृते॥ पुष्टे॥ तुष्टे॥ आत्मकु
लदेवते॥ इति प्रत्येकमावाह्य॥ ततो मनो जूतिः प्रतिष्ठाप्य॥ ॐ गणपतये नमः इति प्रणवादि न
मोंते चतुर्थ्यंतं स्वस्वनाममंत्रेण पंचदशोपचारैः षोडशोपचारैः पूजयेत्॥ मातृणां गणदेवतां॰
लप्रक्षेतु गणपति॥ गौरी पद्मा शची मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मात
रो लोकमातरः॥ धृतिस्तुष्टिः आत्मकुलदेवता इहागच्छ इह तिष्ठेति॥ आवाह्य स्थापयित्वा॥ प्र
तिष्ठाप्य॥ ॐ गणपत्यादिभ्यो नमः इति पूर्ववदुपचारैः पूजयेत्॥ ततः पंचसप्तवानानि चा
न चोच्छ्रिता॥ कुड्यादिषु वसोः पवित्रमसीति घृतधाराउत्संस्थाः ततो वसोर्धारादेवता॰
भ्यो नम इति पंचोपचारैः पूजां कुर्यात्॥ वसोर्धाराकरणं च कात्यायनामिकान्येषां॥ तत्र आयु॰

ना

ष्यमंत्रजपः॥ आयुष्यंवर्चस्यमिति स्य च स्य दक्ष ऋषिः उष्णिक् शाक्वरी त्रिष्टुप् छंदांसि हिरं
ण्यमदेवता जपे विनियोगः॥ आयुष्यं·नत दक्षाय सि·दीर्घायुत्वा·य शत शरदा·इत्यायुष्य मंत्र जपः॥
अथ नांदीश्राद्धं॥ कर्ता पूर्वाह्णे सुस्नातः॥ सुप्रक्षालित करचरणः स्वाचांतः सुस्नातानाचां॰ तान्
अष्टौ ब्राह्मणानाहूय पलिप्ते गोमयोपलिप्तमंडले स्वागतं वसुस्वागतमिति प्रश्नकं प्रश्नोत्तरं
पूर्वक प्रागग्रकुशोत्तरेष्वासनेषु प्राङ्मुखान् दक्षिणोपक्रमान्। उदग्पर्वगान् उपविश्य स्वयमुद
ङ्मुख उपविश्य आचार्यो विप्र योर्जानुनी स्पृशन् प्राग्वत् देशकालौ संकीर्त्य अमुक कर्मनिमित्ता
भ्युदयिक श्राद्धाख्यकर्मणि नांदीमुखास्मन्मात्रादित्रयं नांदीमुखास्मत्पित्रादित्रयं नांदीमुखास्म
न्मातामहादित्रयसंबंधिसत्यवसुसंज्ञिक विश्वेदेवक्षणः भवंतो मयानिमंत्रितो इति तांबूला·
दिदानपूर्वकं निमंत्रयेत्॥ निमंत्रितोस्मि इति प्रतिवचनं॥ पुनस्तांबूलादिकमादाय द्वितीयो विप्र
योर्जानुनी स्पृशन्॥ अद्येहामुकगोत्राणां नांदीमुखास्मन्मातृपितामहीप्रपितामहीनां अमुका
मुकदेवीनां अद्य कर्तव्यामुक कर्मनिमित्ताभ्युदयिक श्राद्धे भवंतो मया निमंत्रितो इति तांबूलादि
दानपूर्वकं निमंत्रयेत्॥ निमंत्रितोस्म इति प्रति·॥ पुनस्तांबूलादिकमादाय तृतीयो विप्रयोर्जानु ८

नी स्पृशन्॥ अद्येहामुकगोत्राणां नांदीमुखास्मत्पितृपितामहप्रपितामहानां अमुकामुकश
र्मणां अद्य कर्तव्यामुककर्मनिमित्ताभ्युदयिक श्राद्धे भवंतो मया निमंत्रितो इति तांबूलादिदा·
नपूर्वकं निमंत्रयेत्॥ निमंत्रितो इति प्रतिवचनं॥ पुनस्तांबूलमादाय अद्येहामुकगोत्राणां नांदी
मुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां अद्य कर्तव्यामुक कर्मनि
मित्ताभ्युदयिक श्राद्धे भवंतो मया निमंत्रितो इति तांबूलादिदान पूर्वकं निमंत्रयेत्॥ निमंत्रितोस्मि
इति प्रतिवचनं॥ अक्रोधनैः शौचपरैः॥ कार्यमिति सर्वत्र नियमान् श्रावयेत्॥ ततो देवद्विजपूर्व·
कं चरणप्रक्षालनं विधाय अद्येह नांदीमुखास्मन्मात्रादित्रय नांदीमुखास्मत्पित्रादित्रयं नांदी·
मुखास्मन्मातामहादित्रयसंबंधिसत्यवसुसंज्ञिका विश्वेदेवाः एतत्सपाद्यार्घ्यं वो नमः इति गंधाक्षता·
दियुक्तं पाद्यार्घ्यं दत्वा· अद्येहामुकगोत्राः नांदीमुखास्मन्मातृपितामहीप्रपितामह्यः अमुकदेव्यः
एतत्सपाद्यार्घ्यं वो नमः इति वर्ग ब्राह्मणचरणयोर्दत्वा· अद्येहामुकगोत्राः नांदीमुखास्मत्पितृपि·
तामहप्रपितामहाः अमुकामुकशर्माणः एतत्सपाद्यार्घ्यं वो नमः इति पित्रादिवर्गब्राह्मणयोर्दत्वा॥
अद्येहामुकगोत्राः नांदीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः

प्र॰ग॰ल॰

एतत्साद्यर्घ्यं वो नम इति मातामहवर्गब्राह्मणचरणयोरर्घ्यं दत्वा॥ ततो ब्राह्मणानाचम्य॥ स्वय
माप्याचम्य श्राद्धदेशे प्रथमकल्पिते ब्राह्मणेष्विदमासनमास्यतामिति प्रयोगेणोदगपवर्गं प्रागु
स्तां देवपूर्वं द्विजानुपवेश्य स्वयमुदङ्मुख उपविश्य कर्मसौकर्यार्थं कर्मपात्रे जलं नार्य दूर्वाद
धियवकुशांस्तत्र निक्षिप्य प्राणायामत्रयपूर्वकं विष्णुस्मरणं कृत्वा कर्मपात्रे जलेनोपकर
णानि प्रोक्ष्य दूर्वांकुरायवजलानि दक्षिणकरेणादाय पूर्ववद्देशकालौ संकीर्त्य नांते अमुककर्म
निमित्ताभ्युदयिकश्राद्धाख्ये कर्मणि॥ अमुकगोत्राः नांदीमुखास्सन्मातृपितामहीप्रपितामह्
योमुकामुकदेव्यः अमुकगोत्राः नांदीमुखास्सस्त्रीकपितामहप्रपितामहाः अमुकामुकशर्
माणः अमुकगोत्राः नांदीमुखास्सन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः
प्रधानदेवताः सत्यवसुसंज्ञिकाः विश्वेदेवाः अंगदेवाः यथालक्षणहविः ब्राह्मण आहवनीया
र्थे अमुकगोत्राणां नांदीमुखास्सस्त्रीकपितामहीप्रपितामहीनां अमुकामुकदेवीनां अमुकगोत्रा
णां नांदीमुखास्सस्त्रीकपितामहप्रपितामहानां अमुकामुकशर्मणां अमुकगोत्राणां नांदीमुखा
स्सन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां अमुककर्मनिमित्त सत्यव

९

सुसंज्ञिकविश्वेदेवपूर्वकं सांकल्पिकमाभ्युदयिकश्राद्धं भवद्भिरनुज्ञया अहं करिष्ये इति संकल्पः॥
कुरुष्वेति प्रतिवचनं॥ ततः सप्रणवसव्याहृतीकगायत्र्यास्त्रिर्जपः॥ विष्णुस्मरणं॥ मा
त्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसंबंधिनः सत्यवसुसंज्ञिका विश्वेदेवा इदमास
नं वो नम इति प्रागग्रकृतकुशात्रयं यवजलं दक्षिणत आसनोपरि दत्वा॥ अमुकगोत्रा नां
दीमुखास्सन्मातृपितामहीप्रपितामह्योमुकादेव्यः इदमासनं वो नम इति मातृवर्गद्वयासनो
परि विन्यस्य दत्वा अमुकगोत्राः नांदीमुखास्सस्त्रीकपितामहप्रपितामहाः अमुकामुकशर्माणः
इदमासनं वो नम इति पित्रादिवर्गब्राह्मणोद्वासनोपर्यासनं दद्यात्॥ ततः प्रत्यासने दीपस्था
पनं॥ ततो द्वितीयब्राह्मणहस्ते प्रथमब्राह्मणहस्ते दत्वा तत्र जलदानपूर्वकं गंधादिदत्वा कु
शयवजलान्यादाय मात्रादि पित्रादि मातामहादित्रयसंबंधि सत्यवसुसंज्ञिका विश्वेदेवा इ
दमासनं गंधपुष्पधूपदीपवासोलंकरणानि वो नमः॥ अमुकगोत्राः नांदीमुखास्सन्मा
तृपितामहीप्रपितामह्योमुकामुकदेव्यः इमानि गंधपुष्पधूपदीपवासोलंकरणानि
वो नमः अमुकगोत्राः नांदीमुखास्सन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्मा

प्र॰ग॰ल॰

पाः इमानि गंधतांबूलानि वो नमः अन्नपरिवेषणं ॥ पात्रमालभ्य पृथ्वी ते जुहोमि स्वाहेति जपि
त्वांगुष्ठमन्नेवगाह्य इदमन्नमिमा आपः इदमाज्यं इदं हविरित्युक्त्वा मात्रादित्रयपित्रादित्रयमाताम
हादित्रयसंबंधिनः सत्यवसुसंज्ञिका विश्वेदेवाः इदमन्नं सघृतं सोपस्कारसहितं परिविष्टं परिवे
क्ष्यमाणं च द्विजयोस्तृप्तिपर्यंतं अमृतरूपं वो नमः इत्युत्सृजेत् ॥ एवमेव मात्रादिपात्रद्वयमालभ्य
अमुकगोत्राः नांदीमुखास्मन्मातृपितामहिप्रपितामह्यो अमुकीमुकदेव्यः इदमन्नं सघृतं सोपस्का
रसहितं अमृतरूपं वो नमः एवमेव पित्रादिपात्रयोर्मातामहादिपात्रयोरपि संकल्पं कुर्यात् ॥ तत
श्च तृप्तिपर्यंतं वर्जं जपः ततः स्वानुज्ञात्वा अन्नं विकीर्य सकृत्सकृदपो दत्वा पूर्ववद्गायत्रीं जपित्वा म
धुमतीर्मध्वीती च ॥ संपन्नमिति स्पृष्ट्वा सुसंपन्नमिति तैरुक्ते शेषमन्नं किं क्रियतामिति स्पृष्ट्वा ॥
इष्टैः सह भुज्यतामिति तैरुक्ते ब्राह्मणानाचामयेत् ॥ सुप्रोक्षितमस्तु शिवा आपः संतु सौम
नस्यमस्तु नांदीमुखा मातरः प्रियंतां नांदीमुखाः पितामह्यः प्रियंतां नांदीमुख्यः प्रपिता
मह्यः प्रीयंतां नांदीमुखाः पितरः प्रीयंतां नांदीमुखाः पितामहाः प्रीयंतां नांदीमुखाः प्रपिता
महाः प्रीयंतां नांदीमुखाः मातामहाः प्रीयंतां नांदीमुखाः प्रमातामहाः प्री नांदीमुखाः वृद्धप्रमा

तामहाः प्रीयंतां ॥ इति क्षीरयवजलानि दद्यात् ॥ ततः प्रांजलिः आशिषः प्रार्थयेत् ॥ अघोराः पि
तरः संतु संत्विति ब्राह्मणाः गोत्रं नो वर्द्धतामिति अभिवर्द्धतामिति क्रमेणोत्तरं यजमानः वर्द्धता
मिति तैर्दातारो नोभिवर्द्धंतां अभिवर्द्धतामिति वेदाः संततिः संतु इति वेदाः रेव च ॥ श्रद्धा च नो माव्यगम
त् ॥ बहुदेयं च नोस्तु अस्तु इति प्रतिवचनं ततो मात्रादित्रयपित्रादित्रयमातामहादित्र
यश्राद्धसंबंधि वैश्वदेविक श्राद्धप्रतिष्ठार्थममुकशर्मभ्यां नवभ्यां इदं द्राक्षामलकादिमूल्यका
रिरूपां विश्वेदेवता दक्षिणामयाद्दत्तां इति देवब्राह्मणाभ्यां दक्षिणां दत्वा अमुक॰ नां॰ पितृपि॰ हा
नां अमुकामु॰ णां कृतैतद्धान्युदः दत्तां इति पित्रादिब्राह्मणाभ्यां दक्षिणां दत्वा पित्रादिपदस्थाने
मातामह प्रमातामह वृद्धप्रमातामह पद प्रक्षेपेण मातामहादित्राभ्यां दद्यात् ॥ ततो विश्वे देवाः
प्रीयंतामित्युक्त्वा स्वस्त्युत्तरे दत्ते स्वस्ति भवंतो ब्रुवंतु इति सर्वत्र स्तुत्वा स्वस्तीति तैरुक्ते ब्राह्मणान्प्र
णिपत्य प्रसाद्य वाजे वाजेति मावादि वर्ग द्विजपर्वेक देवद्विजो विसृज्य आमावाजस्येति विप्राननुव्र
ज्य प्रदक्षिणीकृत्याचामेत् ॥ ततो मातृकादि विसर्जयेत् ॥ जीवन्मातृकस्य न मातृपार्वणं ॥ जीवन्मा
तामहस्य न मातामहपार्वणमेव ॥ यद्वा तु प्रक्रान्ता संभवतद्वा आमश्राद्धविधिना आमान्नेन कर्तव्यं ॥

प्र·ग·ल

आमान्यस्याप्यऽभावे हिरण्येन कर्तव्यं॥ इति आभ्युदयिकश्राद्धविधिः समाप्तः॥ अथ गर्भाधाना-
ए घ्यसंस्कार उच्यते॥ तत्र प्रथमरजोदर्शने मासादिदुष्टे सति गर्भाधानस्य शांतिपूर्वकं कर्तव्यता। शांति
कवक्तुमिष्टकालादि उच्यते॥ प्रथमे रजसि चैत्रज्येष्ठआषाढभाद्रपदकार्तिकपौष्याश्शुभाः॥ आश्वि
नोमध्यमः। शेषाः शुभाः॥ कश्चिद्वैशाखफाल्गुणपूर्वाद्ययोरयमत्वमुक्तिः तिथिषु प्रतिपच्चतुर्थीषष्ठ्य
ष्टमीद्वादशीचतुर्दशीपौर्णमासी अमावास्या अशुभाः॥ शेषाः शुभाः॥ कश्चित्सप्तम्येकादश्याद्वशुभे अ
ष्टमीद्वादश्योशुभेरुक्तं॥ अन्ये शुभाः॥ केश्चित्सोमोप्यशुभ उक्तः॥ नक्षत्रेषु भरण्यार्द्रापुष्याश्ले
षापूर्वाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदारेवत्योशुभाः॥ चित्राविशाखाश्रवणाश्विनामघा
स्वातयो मध्यमाः॥ अन्यानि शुभानि॥ केचित्तु कृत्तिकापुनर्वस्वनुराधारेवत्योप्यशुभा उक्ताः॥
एवं च तासाम मध्यमत्वं एवमन्यत्रापि॥ योगेषु॥ व्याघातस्यानवनाड्यो गंडातिगंडयोः षट्षट्॥
शूलस्य पंच वज्रपरिघपूर्वार्द्धं वैधृतिव्यतिपातश्चेत्यशुभाः॥ वज्रमध्यमं॥ अशुभ्येनाः॥ क
रणानि॥ विष्टीति नास्ति सर्वाणि शुभानि। अन्हि त्रिधाविभक्ते आद्यो भागः शुभ गःशुभ द्वितीयोम
ध्यमस्तृतीयेहुष्टः एवं रात्रौ सूर्योदयास्तमयाप्यशुभौ रविसंक्रमणार्धे नाडी चतुष्टयं दु ११

र्ध्वांसंशुभासंक्रांतादि दग्धादिनेष्वशुभा॥ संध्योपप्लवग्रहणशौचे सुभर्तृशालश्च चतुर्थ्याष्टम
द्वादश्यस्थचंद्रे जीर्णरक्तनीलमलिनक्लिन्नवस्त्रेषु परिहितेषु नशुभं॥ संमार्जनीकाष्ठमन्नत्या
ग्निशूर्पतुषशुष्कसतलोहपाषाणशस्त्रादि धारिण्या एतैर्युक्तं देशे चाशुभं॥ देहलीद्वारस्थापि
तमातमहेष्वशुभं॥ ऊर्ध्वीस्थानतायानिंद्रितायाश्चाशुभं शय्याधो शुभं पित्रादि सखिभर्तृभि
र्दृष्टमशुभमित्यादिज्ञेयं। दुष्टमासादौ प्रथमरजोदर्शने तांबूलभक्षणादि मंगलाचारणाकु
र्यात् द्वितीये तु शुभं तत्र कुर्यादिति केचित॥ प्रथमे दुष्टे रजोदर्शने द्वितीयं प्रतीक्ष्य तस्मिन्न
प्यशुभे विस्तरेण शांतिं कुर्या[illegible]दित्यपि केचित्॥ प्रथमे एव यथाशक्ति
शांतिं कुर्यादित्यपरे॥ अत्रैकस्मिन्नप्यशुभे शांतिः कार्या॥ द्वित्राद्यशुभसंनिपाते तु तत्सूचित
बह्वशुभनिरासार्थं विस्तरेण शांतिं कुर्यात्॥ शांतिस्तु शौनकोक्ता कार्या विस्तरभयान्ना
त्र लिखिता॥ इति शौनकोक्ता कर्मपद्धतौ ऋतुशांतिविधिः॥ अथ गर्भाधानं॥ रजोदर्शनात्॥ शोडशा
होरात्रापि ऋतुस्तन्मध्ये आद्यरात्रिचतुष्टयं॥ पर्वादिनिंद्याद्दिनानि च वर्जयित्वा मघामूला
दिव्यतिरिक्ते देवज्ञोक्ते शुभकाले दंपत्योश्चंद्रताराबलान्विते गर्भाधानं कार्यं॥ तत्रापि युग्मासु

प्र॰ग॰ल

॥दक्षिणेन पाणिना तस्याः स्मरमंदिरमभिमृश्य जपेत्॥ तत्र मंत्राः॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंश
तु॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते॥ गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके॥ गर्भं ते अश्विनौ दे
॥वावाधत्तां पुष्करस्रजौ॥ इत्यृक्त्रयं स्त्रियं स्वनं [illegible]॥
रात्रिषु पुत्रः युग्मासु कन्या जायते॥ इत्याश्वलायनं॥ तत्रायं क्रमः॥ कर्ता प्रातरभ्यंगस्नानं कृत्वा पत्नीमपि
नवोदकुंभसलिलैः॥ सप्तमृत्तिकापंचपल्लवपंचवल्कसहितैः स्नापयित्वा तया सह मंगलवस्
त्राभरणानि धृत्वा॥ आचम्य देशकालौ स्मृत्वा अस्याः मम भार्यायाः प्रतिगर्भसंस्कारातिशयद्वारा
अस्यां जनिष्यमाण सर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हण द्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधाना
ख्यं कर्माहं करिष्ये॥ इति संकल्प्य॥ स्वस्तिवाचनाभ्युदयिके कृत्वा स्निग्धमधुराहारं पुष्पमाल्यानुलेप
नाद्यलंकृता॥ तथाविधां कामयमानां दक्षिणनासावहे वायु रात्रौ तृतीये यामे अस्मिन्गत्वा धर्म वि
रुद्धं चुंबनदंशनाघातादिभिः चतुःसुरतापसपाप्रमये गच्छेत्॥ गमनादूर्ध्वं शौचादि कृत्वा॥ स्वाचांतः वध्वाः
दक्षिणस्कंधोपरि हस्तं नीत्वा हृदयं स्पृशेत्॥ यत्ते सुसीमेति प्रजापतिऋषिः जगतीछंदः हृदयं देवता हृ
दयालंभने विनियोगः॥ यत्ते सुसीमे हृदयं दिवि चंद्रमसि श्रितं॥ वेदाहं तन्मां तद्विद्यात् पश्येम शरदः श
तं जीवेम शरदः शतं शृणुयाम शरदः शतमिति॥ ततः अस्य गर्भाधानाख्यस्य कर्मणः सांगतासिध्य
र्थं स्मृत्यक्तानुसंख्याकान् ब्राह्मणान् भोजयिष्ये॥ प्रथमर्तुगमने नांदीश्राद्धादिकं न यथाकाम्यगमने
हृदयालंभनेतु नवसेव॥ आद्यगर्भाधारणान् एवं गच्छतः सायदि गर्भं न धत्ते तदा ओषधं दंपतिः कुर्यात्॥ १२
॥ततो हेमकदलीदानमंत्रः॥ सुपत्रे सुभगे देवी रंभे नारक्रस्वल्लभे॥ रक्ष मां भजतो दोषात् दुष्टस्या
स्य विगर्हिता॥ १॥ दानेनानेन मे देवः सविता विश्वतोमुखः॥ प्रीतो भवतु मे सद्यो दोषाद्दुरितदुष्करं॥ २॥

यस्मिन्नहनि पुष्यनक्षत्रं भवति॥ ततः पूर्वस्मिन्नहनि उपोष्य॥ उपोषितो भर्ता पुष्यं दिने स्त्रियाव्दृहती
श्वेतपुष्पाः मूलमुत्पाट्य॥ ऋतुस्नातायां चतुर्थेहनि स्नातायां भार्यायां रात्रौ तन्मूलमुदकेन पिष्ट्वा द
क्षिणनासापुटे नस्यं दद्यादिति मंत्री॥ इयमोषधीरिति मंत्रस्य प्रजापतिऋषिः जगतीछंदः ओषधी देव
ता। आसिंचने विनि॰॥ इयमोषधी त्रायमाणा सहमाना सरस्वती॥ अस्या अहं बृहत्याः पुत्रः पितुरिव
नाम जग्रभमिति॥ यदि प्रथमरजोदर्शनं दुष्टतिथिवारनक्षत्रादिषु जायते तदा दोषपरिहारार्थं शौनको
क्तां शांतिं कृत्वा कार्यं॥ प्रशस्ततिथ्यादिषु ऋतुदर्शनपर्यंतं तस्यागमनं वर्जनीयं॥ तदाह ज्योतिर्विशेषः॥
प्रथमर्तौ न्यादोषेयदि दृश्यते नत्सुष्वं ततः शांतिकं कर्म कार्यं॥ विसर्जये देवते देव कृशाप्यापावत रजो दृ
र्शनमिष्टकाल इति॥ एतत्कर्माकरणाप्रायश्चित्तमाह॥ आचार्यः॥ गर्भाधानस्य करणात्तस्याज्ञातस्तदु
ष्यति॥ अकृत्वा गां द्विजे दत्वा कुर्यात्पुंसवनं पतिः॥ इति शौनकर्मपद्धतौ गर्भाधानविधिः॥ अथ पुंसवन
विधिः॥ तत्र गर्भाधानप्रभृति मासे द्वितीये तृतीये वा यस्मिन्नहनि पुंनक्षत्रेण चंद्रमा युज्येत तस्मिन्न
नि स्त्रियमुपवासं कारयेत्॥ अशक्तौ वक्तुं प्राणायामं कृत्वा॥ अस्यां भार्यायां उत्पत्स्यमानगर्भस्य बै
जिकगार्भिकदोषपरिहारार्थं पुरुषज्ञानोदय प्रतिरोधिपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनं क

प्र॰ग॰ल

रिष्येइतिसंकल्पः॥ततोमातृकापूर्वकंनांदीश्राद्धंकृत्वाततस्तांस्नापयित्वाहतेवाससिपरिधाय
ततोरात्रौन्यग्रोधावरोहान्यग्रोधाद्धगांश्चोदकेनपिष्ट्वानासिकायादक्षिणपुटेआसिंचतिमन्त्रौ॥
हिरण्यगर्भइत्यस्यप्रजापतिऋषिःत्रिष्टुप्छंदःप्रजापतिर्देवता॥अद्भ्यःसंभृतइत्युत्तरना
रायणऋषिःत्रिष्टुप्छंदःपुरुषोदेवताआसिंचनेवि॰॥हिरण्यगर्भसं॰विधेम॰अद्भ्य॰संभृतः॥इ
तिमंत्रौउक्तौदध्यात्॥न्यग्रोधावरोहेषुन्यग्रोधांकुरेषुचपिष्यमाणेषुकुशाकुरकस्यसोमांसोश्च
वयूवान्तन्मध्येप्रक्षिप्यपेषयमिछया॥सयदिकामयतवीर्यवान्स्यादित्यागर्भः।तदातस्यास्त्रियाः
अंकेउदकपूर्णशरावंनिधायगर्भमभिमंत्रयते॥सुपर्णोसीतिप्रजापतिऋषिःआकृतिछंदःगरु
त्मान्देवताअभिमंत्रणेविनियो॰॥सुपर्णोसि॰दिवद॰वृत्स्वः॰पतेसंतेमंत्रेणोएतद्देवःपुरांगर्भचलना
दकृतंयदिसिमंतात्प्राकृविधानत्र्यस्यदिनेपि॰बृहस्पतिः॥आनादिष्टपूर्वकंकुर्यात्॥गौणेष्वे
तेषुकर्मचोदितमाचरेत्प्रायश्चित्तप्रकारेणप्रोक्तानिकृतिमारेचेत्इतिमंउनवचनात्॥गर्भसं
स्कारःस्यादितिककर्कस्यसंमतिः॥अतस्तद्गर्भसंस्कारात्तद्गर्भप्रतिपुंसवनइति॥पुंसवनंसीमंतो
न्नयनंचप्रतिगर्भकार्यंनिसनक्षत्रेसंस्कारकारणात्तस्यचयावद्द्रव्यभावित्वादिति॥अस्याः

पतिवादेवरोवापिकर्तास्यात्।देवरस्तस्यःपसूरसंभवेइतिआश्वलायनकारिकायां।विशेषविधा
नात्॥इतिश्रोडषकर्मपद्धतौपुंसवनविधिः॥अथसीमंतोन्नयनं॥तच्चगर्भमासापेक्षयाषष्ठाष्टमे
वामासिअसंभवेसर्वंशुक्लपक्षेपुन्नक्षत्रेभवति॰अत्राप्यधिकमासगुरुशुक्रास्तादिनानदोषः
॥कालांतरोसंभवे॰नियतकालस्यास्यप्रथमगर्भेगर्भांतरेषुनियमइतिककर्कोपाध्यायः॥वाक्यापि॥
सकृत्संस्कृताश्चसंस्कारसीमंतेनद्विजस्त्रियः॥यंयंगर्भप्रसूयंतेसस्सर्वःसंस्कृतोभवेत्॥संस्कृताश्चसं
स्कृतानारीसर्वगर्भेषुसंस्कृतेति॥सीमंतोन्नयनंकर्मस्त्री संस्कारइष्यते॥केचिद्गर्भसंस्कारान्प्र
तिगर्भप्रयुंजते॥उक्तरूपांविकल्पोयंभाष्यकारादिसंमते॥अथप्रयोगः॥कर्तामंगलस्नापिताप
रिहितप्रावृत्तांअहतेवासोयुगलांअलंकृतपत्नीबहिःशालायांस्वदक्षिणतउपवेश्यदेशकालौ
स्मृ॰त्वाममभार्यायागर्भाभिवृद्ध्यर्थंसीमंतोन्नयनाख्यंकर्मकरिष्ये॥अथवातनुरुधिरप्रिया
लक्ष्मीभूतराक्षसीगणदूरनिरसनक्षेमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशनद्वारान
द्वाराप्रतिगर्भसमुद्भवेनोनिबर्हणजनकांतिशयद्वाराश्रीपरमेश्वरप्रीत्यर्थंस्त्रीसंस्काररूपंसीमं
तोन्नयनाख्यंकर्मकरिष्ये॥इतिसंकल्प्य॥पुण्याहवाचनपूर्वकंमातृकापूजनान्दीश्राद्धेकृत्वा॥

प्र·ग·त्न

बर्हिंरायां पचन्नु संस्कारान् कृत्वाग्निमुपसमाधाय॥ ततो वेकस्मिन्कावधारणं॥ पूर्वेपब्रह्मस्
योगमनं। उत्तरे पात्रासादनं। द्वे पत्रे। ताम्रमयी आज्यस्थाली। चरुस्थाली। पालाशसमिधां प्राचावाघा
रौ समिधत्तमे आज्यभागौ। पूर्णपात्रं दक्षिणां। प्रति महाव्याहृतिभिर्विनयनं। प्रजापतिं। इंद्रं। अग्निं।
सोमं आज्येन तिलमुद्गमिश्रं चरुणा। अग्निस्विष्टकृत्शेषे। अग्निं वायुं सूर्यं अग्नीवरुणावग्निव
रुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरुतस्स्वर्कान् वरुणं प्रजापतिं कर्मसमृध्यर्थं जय। दे
वताः कर्मण उपप्रायश्चित्तदेवाः एताः अंगप्रधानार्थं देवताः अस्मिन्नस्मिन्नो न्वयनाख्ये क
सना र्मणि अहं यक्ष्ये॥ अग्नेर्दक्षिणतो ब्रह्मास्तरणं। तत्र ब्रह्मोपवेशनं वारुणमुकं चसं अंतरिक्ष्यं उदकेन
पूरयित्वा भूमौ निधाय अलभ्यां प्रणीतो नरतोऽग्नेः स्थापनं बर्हिषा प्रदक्षिणमग्नेः परिस्तरणं॥
अथ पात्रासादनं। द्वद्वं कार्यं पवित्रच्छेदना नित्रिणि। द्वे पवित्रे। प्रोक्षणी पात्रं वारणं। आज्यस्थाली च
रु स्थाली संमार्जनकुशाः। उपयमन कुशाः समिधस्तिस्त्र; स्रुवः आज्यं। तंदुललिलमुद्गानां कर्मे
णापृथक्कृत्सादनं उपकल्पनीयानि मृदुपिंड युग्मान्नोदुंबर फलान्येकस्तबक बद्धानि। त्रयाद
र्भपिंजुलः त्रेणि शलाकाविरत तरस्त्रांकुः पूर्णपात्रं वीणागाथिनो पवित्रच्छेदनैः पवित्रीकरणं प्रोक्षणीपात्रे प्र १८

णितोदकमासिंच्य। पवित्राभ्यामुत्सवनं प्रोक्षिण्यासव्यहस्ते करणं दक्षिणहस्तेनोद्दिंगनं। प्रणितो
दकेन प्रोक्षणीनां प्रोक्षणं। ततो यथासादित पात्राणां प्रोक्षणं प्रोक्षण्युदकेन असंचरे प्रोक्षणीनां नि
धानं। आज्यस्थाल्यामाज्यनिर्वापः प्रथमं तावच्चरुपात्रे मुद्गप्रक्षेपः अर्धश्रिते मुद्गेषु तिलतंदुला
नां युगपत्प्रक्षेपः पर्यग्नीकरणमुभयोः श्रुते च रौस्रुवं प्रतपनं संमार्जनकुशैः स्रुवं संमार्जनं प्र
णीतोदकेन प्रोक्षणं पुनः प्रतपनं निधानं आज्योद्वासनं चरुरुद्वासनं आज्योत्सवनं अवेक्षणं अप
द्रव्यनिरसनं प्रोक्षण्युत्सवनं उपयमन कुशादानं तिष्ठत्समिधादानं प्रोक्षण्युदकेन प्रदक्षिणमग्नि
पर्युक्षणं प्रणीतासु पवित्रं निधानं अथ दक्षिणं जान्वाच्य। जुहोति स्थाने उपविष्टब्रह्मणाकुशैर
न्वारब्धः स्रुवेण जुहोति। स्रुवेणाज्यं गृहीत्वाग्नेः प्रस्तुगुत्तरदेशतः आरभ्याद दक्षिणमाग्नेयीं प्राजा
पसमथाहुतीं तत्र इंद्राय स्वाहेति सततं जुहुयाद्बुधिः दक्षिणादिशिमारभ्य ईशानानि पूर्ववद्धरे
दिति कारिकावचनात्। अग्नेरुत्तरभागे॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम। अग्नेर्दक्षिण
भागे। इन्द्राय· इदं· समिद्धतमे। अग्नये· इदं· सोमाय· इदं। ततः स्थालीपाकान्स्रुवेणादाय· ॐ प्रजाप
तये· इदं प्र· अग्नये स्विष्टकृते· इदमग्नये स्विष्टकृते·। आज्यं गृहीत्वा भूर्भुवस्स्वरिति मंत्रा पांप्रजाप

प्र॰ग॰त

तिऋषिःक्रमेणगायत्र्युष्णिगनुष्टुप्छंदांसि अग्निर्वायुःसूर्योदेवता आज्यहोमेविनियोगः॥ॐ
भूःस्वाहा इदंम॰ ॐभुवःस्वाहा इदंवा॰ ॐस्वःस्वाहा इदंसू॰॥ त्वंनोअग्नइतिमं॰ वामदेवऋषिःत्रि
ष्टुप् अग्निर्वरुणोदेवता प्रायश्चित्तहोमेवि॰॥ ॐत्वन्नोअग्ने॰ ॐसत्वन्नोअग्ने॰ इदमग्नीवरुणाभ्यां
नमम। अयाश्चाग्नइतिवामदेवऋषिर्बृहती अग्निर्देवताप्रा॰। ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च
सत्यमित्त्वमयाअसि॥ अयानोयज्ञंवहास्ययानोधेहिभेषजं स्वाहा इदमग्नयेअयसेनमम॥
येतेशतमितिवामदेवऋषिःत्रिष्टुप् वरुणःसविताविष्णुर्विश्वेदेवामरुतःस्वर्कादेवताप्रायश्चित्ता
हुतिहो॰। ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः॥ तेभिर्नोअद्यसवितोतविष्णुर्वि
श्वेदेवामरुतःस्वर्काःस्वाहा॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्चनमम॥
उदुत्तममितिशुनःशेपऋषिःत्रि॰ वरुणोदेवताप्रायश्चित्तहो॰॥ ॐउदुत्तमं॰ स्वाहा॰ इदंवरुणाया
दित्यादितयेनमम॥ ॐप्रजापतयेस्वाहा इदंप्रजापतयेनमम॥ ततोजयाहोमः॥ ततश्चतुर्गृहीते
नाज्येनप्रायश्चित्तहोमेविनियोगः॥ ततःसंस्रवप्राशनं। पवित्राभ्यांमार्जनं। पवित्रप्रतिपत्तिः॥
ब्रह्मणेपूर्णपात्रदानं॥ अग्नेपश्चात्प्रणीताविमोकं हस्तेनगृहीत्वा॰ ब्राह्मणअस्यसीमंतोन्नयना ३५

ख्यस्यकर्मणःसांगतयापूर्णपात्रंतुभ्यमहंसंप्रददेनममेति ब्राह्मणहस्तेजलंदत्वा ब्रह्मास्वस्तीत्यो
स्वाइदातुपृथ्वीत्वाप्रतिगृह्णात्वितिजपेत्॥ प्रणीताविमोकः ततोग्नेःपश्चात्भद्रासनेगर्भिण्यु
पविशेत्॥ ततोयुग्मेनसटानुग्रप्स्तेन औदुंबरेणत्रिभिश्चदर्भपिंजुलैः॥ त्रेण्याशलल्याविरतर
शंकुना पूर्णचात्रेणचेसेभिःसर्वैःफलितैःस्त्रियासीमंतमूर्ध्वंविनयति॥ भूर्भुवस्वरितिमहा
व्याहृतीनांप्रजापतिऋषिःक्रमेणगायत्र्युष्णिगनुष्टुप्छंदांसि। अग्निर्वायुःसूर्योदेवताःविन
यनेविनियोगः॥ ॐभूर्भुवःस्वर्विनयामितिमंत्रेण॥ ततःऔदुंबरींद्विपंचकस्यावेण्यांबंधनं॥
अयमूर्जावतोवृक्षइतिमंत्रस्यप्रजापतिऋषिःतुरीयछंदः फलिनीदेवता वेणीबंधनेविनियोगः॥
अयमूर्जावतोवृक्ष ऊर्जीवफलिनीभवेतिमंत्रेण॰ ततोवीणागाथिनौसोमराजानंगायतामिति
प्रेष्यंददाति। वीणागाथिनोएवंप्रेषितौ। सोमएवनइतिमंत्रस्यप्रजापतिऋषिःगायत्रीछंदःसो
व३ मोदेवता। गायनेविनियोगः॥ सोमएवनोराजेमामानुषीप्रजाः॥ अविमुक्तचक्रआसीरंस्तीरेतु
भ्यमसावितिमंत्रेणवीणागाथिनोगानं॥ असौस्थानेसमीपावस्थितायाः नद्याः नामग्रहणं
गंगायमुनाइत्येवमादिप्रथमांतनामग्रहणंगर्भिणीकरोत्॥ ततोब्राह्मणभोजनं॥ इतिशोउषकर्मण

गर्भविपान जनितस्य कलदोषनिबर्हणायुर्मेधाभिवृद्धि ४

प्र॰ग॰त

इतोसीमंतोन्नयनपद्धतिः॥ अथ जातकर्मोच्यते॥ सोष्यंतिं। श्लदंकएति। अद्भिरभ्युक्षति। ए-
जतु दशमास्य इति। श्रीकुमारसंस्कारः॥ जातो कुमारः॥ श्रुत्वा अभ्यंगं कृत्वा तिलकादिकं कृत्वा सालं-
कृतः वस्त्राच्छादिते पीठे उपविश्य॥ मात्रादिकं नत्वा चम्य प्राणानायम्य देशकालौ स्मृत्वास्य कु-
मारस्य बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माहं करिष्ये। तदंग
स्वस्तिवाचनमातृपूजनाभ्युदेकश्राद्धं विधाय। मेधाजननायुष्यं करोति। अनामिकया सुवर्णा-
न्तर्हितया मधुघृते प्राशयति। घृतं वा। भूस्त्वयि दधामि। भुवस्त्वयि दधामि। स्वस्त्वयि दधामि। भूर्भुवः स्वः स
र्वं त्वयि दधामि। अथायुष्यं करोति॥ नाभ्यां दक्षिणे वा कर्णे जपति। अग्निसोमब्रह्मदेव ऋषयपितरयज्ञ
समुद्र इत्यादि मंत्राणां क्रमेण प्रजापतिऋषिः क्रमेणानुष्टुप्छंदः अग्निर्देवता आयुष्यमंत्रजपे विनियोगः।
अग्निरायुष्मान्स वनस्पतीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ सोम आयुष्मान्स ओषधीभिरायुष्मां-
स्तेन त्वायुषायुष्मंतं करोमि॥ ब्रह्म आयुष्मत्तद्ब्राह्मणैरायुष्मत्तेन॰। देव आयुष्मंतस्तेमृतेनायुष्मंतस्तेन॰।
ऋषय आयुष्मंतस्ते व्रतैरायुष्मंतस्तेन॰। पितर आयुष्मंतस्ते स्वधाभिरायुष्मंतस्तेन॰। यज्ञ आयुष्मान्
स दक्षिणाभिरायुष्मांस्तेन॰। समुद्र आयुष्मान्स स्रवंतीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ इति ४६

त्रिवारं॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं॥ यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषं॥ इति त्रिवारं जपेत्॥ ततः
दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि॥ दिवस्परीत्येकादशर्चस्य नारायणऋषिः
गायत्री छंदः ब्रह्मादेवता आयुष्यमंत्रजपे विनियोगः॥ दिवस्परीत्यादि अस्ताव्यग्निरित्येतं जपेद्द्वाद-
शर्चः। उत्तमामृचं त्येकादश्या॥ प्रतिदिशं पंच ब्राह्मणानवस्थाप्य॥ ब्रूयात् इममनुप्राणित। पूर्वो ब्रू-
यात्प्राणेति। व्यानेति दक्षिणतः। अपानेत्यपरः। उदानेत्युत्तरः। समानेति पंचम उपरिष्टादवेक्ष्यमाणो
ब्रूयात्। स्वयं वा कुर्यात्। स यस्मिन्देशे जातो भवति। तमभिमंत्रयते। केन मंत्रेण। वेद ते इति मंत्रस्य प्रजा-
ति॰ लिं॰ जपे वि॰। वेद ते भूमि हृदयं दिवि चंद्रमसि श्रितं॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जी-
वेम शरदः शतं शृणुयाम शरदः शतमिति। अथैनमभिमृशति॥ अश्मा भवेति मंत्राणां क्रमे-
प्र॰ त्रि॰ लिं॰ मंत्रजपे वि॰॥ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव॥ आत्मा वै पुत्रनामासि स जीव शरदः
शतं॥ अथास्य मातरमभिमंत्रयते। इडासीति मंत्रस्य प्र॰ अनु॰ लिं॰ मातरमभिमंत्रणे वि॰॥ इडासि
मैत्रावरुणी वीरे वीरमजीजनथाः॥ सा त्वं वीरवती भव यास्मान्वीरवतोकरदिति॥ अथास्य दक्षिणं
स्तनं प्रक्षाल्य प्रयच्छति॥ इमं स्तनमिति मंत्रस्य प्र॰ गा॰ ब्रह्मा दे॰ दक्षिणस्तनप्रक्षालने विनियोगः

प्र॰ग॰त्न

इमꣳ स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये। उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्वेति सव्यं स्तनं मंत्रेण। वामस्तनं प्रक्षाल्य प्रयच्छति॥ केन मंत्रेण। यस्ते स्तन इति मंत्रस्य ऋ॰ गा॰ लिं॰ वामस्तनप्रक्षालने वि॰॥ यस्ते स्तनः शशयो॰ धातवेकः॥ इत्यनेन मंत्रेण। उदपात्रं शिरसे निदधाति॥ आपो देवेष्विति मंत्रस्य प्र॰ त्रिष्टु॰ ब्रह्मा॰ मंत्रजपे वि॰॥ आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ॥ एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां जाग्रथेति॥ आचार्यसंकल्पं कृत्वा वस्त्रगोभूहिरण्यादिदानं भूयसीदक्षिणाम् अभिषेकं विसर्जनं। कर्मसमाप्तौ विसर्जयेत्॥ इति षोडषकर्मपद्धतौ जातकर्मः समाप्तम्॥ अथ षष्ठीपूजा॥ पंचमे षष्ठे एव वा पूर्वरात्रे पित्रादिद्विराचेम्य। देशकालौ संस्मृत्वा॥ अस्य शिशोः आयुरारोग्यसकलारिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विघ्नेशस्य जन्मदानां षष्ठि देव्याः जीवंतिकायाश्च यथा मीलितोपचारैः पूजनमहं करिष्ये इति संकल्पः॥ षोडशोपचारैः तंत्रेण पूजयेत् पृथग्वा संकल्पं पृथगेव पूजा कार्या। एतन्मातिमा चंदनादिकुड्ये लेखनीया। पीठे देवा अक्षतपूजरूपेण विनिवेश्य पुरुषशस्त्रहस्ताः स्त्रियश्च नृत्यगीतकारिण्य अस्यां रात्रौ जागरणं कुर्युः सूतिकागृहं च धूपाग्निदीपशस्त्रमुसलांबु विन्यस्तियुतं कार्यं जन्मदाभ्यो न्यादिना बलिसर्षपाश्च सर्वतो विकिरेत् अन्यदपि यथाचरुः सर्वं कार्यं जन्मादिभ्यो न्यादिना बलिर्देयात्॥ विप्रेभ्यः ताम्बूलरवाद्यदक्षिणा

३८

दिद्घात्। जननाशौचमध्ये प्रथमपंचमषष्ठमदिने षु दाने प्रतिग्रहे च न दोषः अन्नं तु निषिद्धं॥ षष्ठिप्रार्थना॥ गौरीपुत्रो यथा स्कंदः शिशुत्वं रक्षितः पुरा॥ यथा ममाप्ययं बालः षष्ठिके रक्षि तां नमः॥ अतः आगसद्वारस्य उभयतः मातृकाद्वौ द्वौ लिखेत्॥ तासां नामानि। धीषणा वृद्धि माता च तथा गौरी च पूतना॥ आयुर्दा श्योभवस्येना अद्य जन्मदिने मम॥ इति षष्ठीपूजाविधिः॥ अथ नामकर्मोच्यते॥ जन्मत एकादशे द्वादशे वा यथाचार नियतदिने वा नामकरणं कार्यं। नियतकाले विष्टिवैधृतिव्यतिपातग्रहणसंक्रांत्यमावास्याश्राद्धादिदिनेषु न कार्यं॥ नियतकाले क्रियमाणे गुरुशुक्रास्तबाल्यवार्द्धकचक्रातिचारणमलमासादिने निषिद्धानास्ति॥ नियतकालातिक्रमे ज्योतिषशास्त्रोक्ते शुभकाले कार्यं॥ सर्वथात्र पूर्वाह्णः शस्तः। प्राणानायम्य अस्य शिशोः बैजिगर्भिकैनसो निबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्ये॥ मातृपूजाभ्युदयिके विधाय कर्मांगत्वेन ब्राह्मणत्रयं भोजयित्वा॥ पिता पत्यस्य नामधेयं करोति। अत्र ग्रहणात् पितुरनियमो गम्यते॥ अत्राप्यसन्निदिने पितरि अन्यः कश्चित्कुलवृद्धः करोति। एते पितरि सं निधौ तिष्ठत्स न्यो नामधेयं कुर्यात्। स्वकुलदेवतानक्ति रिति नाम कृत्वा। जन्मकालिनमासनाम कुर्यात्॥ ततः। कृत्स्नोनं

प्र॰ग॰ल॰

तोच्युतश्चक्रीवैकुंठोथजनार्दनः॥ उपेंद्रोयज्ञपुरुषोवासुदेवस्तथा हरिः॥ योगीशोपुंडरीकाक्षोमासना
मान्यनुक्रमात्॥ अथयथाचारेवेत्रादिमार्गशीर्षादिवाक्रमः॥ अथस्त्रीविषयः॥ श्रीर्लक्ष्मीः कमलापद्मा
सीतासत्याचरुक्मिणी॥ माधवीचंद्रिरादेवीतुलसीजांबुवत्यपि॥ गणयेंमासनामंचमार्गमासान्यनु
क्रमात्॥ ततस्त्रीपुरुषवाचीदेवतावाचिवास्वेष्टंवायुग्माद्यक्षरंकुमारंप्रतिष्ठाकामश्चतुरक्षरंब्रह्मवर्च
सोनामोनामकुर्यात्॥ तच्चघोषवदाद्यंघोषवंतिचाक्षरणीगघजजझ्यचुउपादघनबभमअंतस्था
चरलवाः॥ अंतनाम्नेमध्यमवंतिदीर्घावसानांकृत्समयांतंनतद्धितन्यायास्तुअयुजोक्षरंआका
रांतंतद्धितंब्राह्मणस्यशर्मांतंनामकुर्यात्॥ क्षत्रियस्यवर्मांतंवैश्यस्यगुप्तांतंशूद्रस्यदासांतं॥ तत्रा॰
यंशिष्टाचारः॥ तंदुलकांस्यपात्रेप्रसार्य॥ तदुपरिसुवर्णशलाकयाकुलदेवताप्रयुक्तं मादावमुकनक्ष
त्रतिनामलेख्य॥ ततोमासः॥ ततोवकहडारव्ययोनिः शास्त्रोक्तानुसारेणजन्मनक्षत्रपादप्रयुक्ता
रक्षादिनाम॥ ततोव्यवहारिकंस्वेष्टंनामेतिचतुष्टयंलिखित्वानामदेवताभ्योनमइतिसंपूज्यअमुक
नाम्नात्वामुकसीतिस्व दक्षिणस्यमातुःसंगस्थितस्यशिशोर्दक्षिणकर्णेकथयित्वा॥ मनोर्
ज्योतिरित्यादिमंत्रपठंतिविप्रैः नामसुप्रतिष्ठितमस्तित्युक्ते अमुकनाम्नागणावामायंभव

तोभवारयतइत्युक्तानामकर्त्रप्रतिनामविप्रानभिवादयेत्। तेचायुष्मान्भवत्वमुकइतिवदेयुः॥
तत्रनाम्नाश्रेवनिवादनीयागुणंचेत्सपिवदंति॥ ततः कर्तादेवताभ्योब्राह्मणेभ्यश्चनत्वा। दशसंख्याकान्
विप्रान्भोजयेत्। दक्षिणांदद्यात्। विप्राशिषश्चगृह्णीयः। कुमार्याअपिनामकरणंकार्यममंत्रकंविषमाक्ष
रंतुतन्नाम॥ इतिषोडशकर्मपद्धतौनामकरणःसमाप्तः॥ अथपर्यंकारोहणं॥ तत्रनामकरणादिनेषो
डशेद्वात्रिंशेस्मिन्नाज्योतिःशास्त्रोक्तमृदुध्रुवक्षिप्रनक्षत्रादियुक्तेशुभकालेयथाचारकुलदेवतापू
जांविधायालंकृतशिशुंहरिद्राद्यलंकृतेपर्यंकमात्राद्याःसौभाग्ययुक्ताःस्त्रियायोगगुण्यिनंदरिस्मरस्तो
त्रसंगीतवाद्यादिसमलंकारप्राक्शिरसंन्यसेयुः। स्वस्याचारप्राप्तंवान्यदपिकार्यं अथदुग्धपानं॥
एकत्रिंशद्दिनेद्वितीयजन्मनक्षत्रेवान्यस्मिन्वान्नप्राशनंनक्षत्रयुक्तेशुभदिनेकुलदेवतादिपूजांने॰
गोक्षीरशंखेनधात्रीमातान्याधा सुभगाअन्यावासुभगालंकृतंकुमारंदक्षिणशिरसंप्राक्शिरसंवा
पायसेदिति। अथनिष्क्रमणं॥ जन्मनाचतुर्थेमासिजन्मदिनेजन्मनक्षत्रेवा॥ प्राणानायम्यदेशकालौ
स्मृत्वाअस्यकुमारस्यगृहान्निष्क्रमणमहंकरिष्येइतिसंकल्प्य। तदंगतयाविहितंमातृकापूज
नपूर्वकंनांदीश्राद्धंकृत्वाअलंकृतशिशुमाताअंकेकृतेनिवेदयेत्घोषादिसहितंगृहान्बहिर्नीय॥

प्र·ग·त्र

तच्चक्षुरिति मंत्रस्य दध्यं गाथर्वण ऋषिः पुरउष्णिक् छंदः सूर्यो देवता सूर्यदर्शने विनियोगः॥ तच्च
क्षुरिति सूर्यं दर्शयेत्॥ कुमारस्यास्मिन्नेव मासे शुभे दिने रात्रौ चंद्रदर्शनं कारयेत्॥ चंद्रार्कयोर्दिगी
शानां दिशां च वरुणस्य च॥ निक्षेपार्थमिमं दास्ये ते त्वां रक्षंतु सर्वदा॥ अप्रमत्तं प्रमत्तं वा दिवारात्रमथा
पि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥ एवं शिशुरक्षणार्थं देवान् प्रार्थयेत्॥ इति षोडशकर्म
पद्धतौ निष्क्रमणः समाप्तः॥ अथोपवेशनविधिः॥ पंचमे मासे शुक्ले पक्षे ज्योतिःशास्त्रोक्ते शुभति
थौ पूर्वाह्णे स्वस्तिवाचनं कृत्वा वराहं पृथ्वीं गुरुं देवं द्विजान् पूजयित्वा शुभां गमुपलिप्य मत्र मंडलं
कृत्वा॥ तत्र शंखतूर्यादिमांगलिकध्वनौ क्रियमाणे शिशुमुपवेशयोभिमंत्रयेत्॥ रक्षैनं वसुधे देवी सदा
सर्वगतं शुभे॥ आयुःप्रमाणं निखिलं निक्षिप्य स्व हरिप्रिये॥ अचिरादायुषस्तस्य ए के चित्सरिपं
थिनः॥ जीविता विनरोग्येषु निर्दहस्वाचिरेण तान्॥ धारिण्य शेषभूतानां मातास्त्वमधिगास्यसि॥
कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति॥ ततो ब्राह्मणान् पूजयित्वा शिशोः वाचयित्वा नीराज
नायुक्तं सर्वं कुर्यात्॥ एवं कुमार्या अपि॥ इत्युपवेशनं॥ अथान्नप्राशनप्रयोगः॥ जन्मतः षष्ठे मासे
ज्योतिःशास्त्रतिथिनक्षत्रादि शुभकाले पूर्वाह्णे पित्रादिः शिशोरन्नप्राशनं कुर्यात्॥ षष्ठे मासि च तत् १९

यतेतदा गुरुशुक्रमौढ्यादिदोषाधिकं मासादिदोषश्च नास्ति पित्रादि सभार्यायाः शिशोर्मंगल
स्नानं कृत्वा देशकालौ संकीर्त्य ममास्य शिशोः मातृगर्भमलप्राशनं शुद्ध्यान्नाद्यब्रह्मवर्चस्तेजइंद्रि
यायुर्लक्षणफलसिद्धि बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं अस्य कुमार
स्यान्नप्राशनाख्यं कर्माहं करिष्ये इति संकल्प्य॥ तदंगं स्वस्तिवाचनाभ्युदयिके कृत्वा पंचभू
संस्कारान् कृत्वा लौकिकाग्नि स्थापनं। अग्नेः पश्चादुपविश्य प्राणानायम्य अस्य कुमारस्यान्नप्रा
शनमहं करिष्ये। तदंगत्वेन वैकल्पिकावधारणं करिष्ये। तत्र पूर्ववत् ब्रह्मणोगमनं उत्तरे पात्रा
सादनं। द्वे पवित्रे। ताम्रमयी आज्यस्थाली। चरुस्थाली च। पालाशाः समिधः। प्रांचावाघारौ। समिधन्न
मे। आज्यभागौ। पूर्णपात्रं। दक्षिणाहं ते निप्राशने। एतान्वैकल्पिक पदार्थान् हं करिष्ये। अथ देवता
न्विध्यानं। तत्र प्रजापतिं। इंद्रं। अग्निं। सोमं। देवीं वाचं। वाजो नः। एता आज्येन। प्राणं। अपानं। चक्षुः।
श्रोत्रं। एता श्च रुणा। शेषेण स्विष्टकृतं। अग्निं। वायुं। सूर्यं। अग्नीवरुणौ। अग्नीवरुणौ। अग्निं।
वरुणं। सवितारं। विष्णुं। विश्वान्। देवान्। मरुतः स्वर्कान्। वरुणं। प्रजापतिं। एताः पुनराज्येन अं
गप्रधानदेवताः अन्नप्राशनकर्मण्यहं यक्ष्ये। ततो ब्रह्मोपवेशनांतं पात्रासादने विशेषः। उपकल्पनी

प्र·ग·ल

येषु सर्वान्रसान् घृतमधुमांसादिकान् दध्यादिकाननुरताम्युपकल्प्य। आज्यभागांतरं। आज्येना
हुतिद्वयं। तत्र देवीं वाचमिति मंत्रस्य भार्गवऋषिः त्रि· देवी वाग्देवता आज्यहोमे वि·॥ ॐ देवीं वा
चमजनयंत देवास्तां विश्वरूपाः पशवो वदंति। सानो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्
वाहा इति प्रथमाहुतिः इदं वाचे न मम। वाजो नो अद्येति मंत्रस्य देवा ऋषयः त्रि· अन्नं देवता आज्य·
॥ देवीं वाचमिति सस्यांते वाजो नो अद्य· जयइ ठ स्वाहा॥ इदं वाचे वाजीय न मम। स्थालीपाकेनाहुतिंच
तुष्टयं। ॐ प्राणेनान्नमशीय स्वाहा। इदं प्राणाय न मम। ॐ अपानेन गंधानशीय स्वाहा। इदमपा
नेन मम। चक्षुषा रूपाण्यशीय स्वाहा। इदं चक्षुषे न मम। श्रोत्रेण यशोयशीय स्वाहा। इदं श्रोत्राय
न मम। ततः स्थालीपाकेन स्विष्टकृत्। ततो महाव्याहृतिभिः नवाहुत्यादि ३ पंचवारुणिकां॥
ॐ प्रजापतये स्वाहा इदं प्र·। ततो संस्रवप्राशनं। पवित्राभ्यां मार्जनं। पवित्रप्रतिपत्तिः। ब्रह्मणे
पूर्णपात्रदानं। प्रणीताविमोकः। अग्नेरलंकरणं। ततः सर्वान्रसान्कुंदकलवणतिक्तकषा
यमधुराम्लान्सर्वरसानानियवशाल्यादिनियपासंनवमेकस्मिन्पात्रेउध्धृत्य ससकृद्देवप्राश
येत्॥ कुमारं ॐ हंतते इति मंत्रेण। स यदि कामयेत कुमारो वाग्मी स्यात्। तदा भारद्वाजमांसं प्राश

येत्। स यदि कामयेत कुमारोन्नाद्यस्यात्। तदा कपिंजलमांसं प्राशयेत्। जवनकामो मत्स्यमांसं प्रा
शयेत्। आयुःकामः कृकलामांसं प्राशयेत्। आघ्रामांसं ब्रह्मवर्चसकामः। सर्वकामः सर्वमांसानि
प्रत्येकं प्राशयेत्। अन्नपर्यायोवा। अन्नपर्यायो वान्नपरिपाटी। अथवा सर्वान्नान्येकीकृत्य प्राश
यो दिसिवं सर्वकामः। सर्वमांसान्येकीकृत्य प्राश·। ततो ब्राह्मणभोजनं। अस्य कर्मणः समृध्यर्थं
ब्राह्मणानेकं संतर्पयिष्ये। तदनंतरं दशब्राह्मणभोजनसंकल्पः। तं भोजयेत्। बालं भूमो उपवि
श्य तदग्रे पुस्तकशस्त्रादिशिल्पानि विन्यस्य जीविकापरिक्षां कुर्यात्। शिशुस्वेच्छया यत्प्र
थमं स्पृशति सास्य जीविका। ततो विप्राशिषो गृहीत्वा बंधुभिः सह भुंजीत। कुमार्यास्त्वेवं त
दा मंत्रकं कार्यं॥ इति षोडशकर्मपद्धतौ अन्नप्राशनः समाप्तः॥ अथ वर्धापनो त्तवः। वर्षपर्यंत
प्रतिमासं ततः प्रतिवर्षं योगः। तिलतैलेनैवांगं समुध्दृत्य तिलतैलेनैव स्वयं स्नात्वा शुक्लवस्त्रयुगं
परिधाय आचांतो गृहाभ्यंतरे एवउपविश्य कुशजलयवान्यादाय। अद्य मम जन्मदिने दीर्घा
युःकामो मार्कंडेयादिनां पूजनमहं करिष्ये॥ इति संकल्प्य॥ तत्र निर्विघ्नार्थं गणपति पूजनम
हं करिष्ये। गणानां त्वा गणपतये नमः इति गंधादिभिः संपूज्य प्रणम्य। रक्षरक्षेति श्लोकद्वयं। गणपत

येक्षमस्वेतिविसर्जनं। एवं॥ गौरीपद्माशचीमेधासावित्रीविजयाजया॥ देवसेनास्वधास्वाहामातर
ोलोकमातरः॥ धृतिः पुष्टिस्तथातुष्टिरात्मदेवतयासह॥ ततोघृतेनवसोर्धारां कुर्यात्॥ ॐगण
पतयेनमः॥ ॐदुर्गायैन॰ ॐकुलदेवताभ्योन॰ ॐगुरुभ्योन॰ देवताभ्योन॰ अग्नयेन॰ विप्रेभ्योन॰
मातृभ्योन॰ सूर्यायन॰ सोमायन॰ मंगलायन॰ बुधायन॰ बृहस्पतयेन॰ शुक्रायन॰ शनिश्चरायन॰
राहवेन॰ केतवेन॰। पंचभूतेभ्योन॰ कालायन॰ युगायन॰ संवत्सरायन॰ मासायन॰ पक्षायन॰ अ
स्मज्जन्मतिथयेन॰ अस्मज्जन्मनक्षत्रायन॰ अस्मज्जराग्निमेशायेन॰ शिवायैन॰ संभूसेन॰ अनसू
यायेन॰ क्षमायेन॰ विष्णवेन॰ भद्रायेन॰ इंद्रायन॰ अग्नयेन॰ यमायन॰ निर्ऋतयेन॰ वरुणायन॰
वायवेन॰ कुबेरायन॰ ईशानायन॰ अनंतायन॰ ॐब्रह्मणेनमः॥ इतिसंपूज्य॥ षष्ठिकेत्रागच्छे
हतिष्ठेत्यावाह्यपाद्यादिकं कृत्वा॥ जगन्मातर्जगद्धात्री जगदानंदकारिणी॥ प्रसीदममकल्याण
पीनमोस्तुषष्ठिदेवते॥ इतिमंत्रेणपुष्पांजलित्रयेणासंपूज्यगंधादिकं कृत्वा॥ वरंप्रार्थयेत्॥
रूपंदेहियशोदेहिभद्रंभगवतिदेहिमे॥ पुत्रांदेहिधनंदेहिसर्वान्कामांश्चदेहिमे॥ इतिवरंप्रार्थ्यप्रण
म्यविसर्जयेत्॥ ततश्चंदनेनाष्टदलंकृत्वाअक्षतानादाय। ॐनमोभगवतेमार्कंडेयायइहागच्छइ 21

॥भृगुवंशावतराय च॥ महातपमुनिश्रेष्ठसप्तकल्पांतजीवन॥ मार्कंडेयनमस्तुभ्यं॥ ५॥

हतिष्ठेतिस्थापयित्वा॥ मार्कंडेयायनमइतिपाद्यं दत्वा॥ ॐआयुष्यंदेहिमाहाभागसोमवंशसमुद्भ
व॥ महातपमुनिश्रेष्ठमार्कंडेयनमोस्तुते॥ इतिपुष्पांजलित्रयेणसंपूज्यवरंप्रार्थयेत्॥ ॐमार्कंडे
यायमुनयेनमस्तेमहदायुषे॥ चिरजीवियथात्वंभोभविष्यतियथामुने॥ मार्कंडेयायमहाभागस
प्तकल्पांतजीवन॥ आयुरारोग्यसिध्यर्थमस्माकंवरदोभव॥ नराणा मायुरारोग्यैः सर्वसौम्यसु
खप्रद॥ सौम्यमूर्तेनमस्तुभ्यंदीर्घायुष्यप्रयच्छमे॥ मार्कंडेयमहाभागप्रार्थयेत्वांकृतांजलिः॥ चिरंजी
वियथात्वंभोभविष्यतितथामुने॥ इतिवरंप्रार्थ्य॥ अश्वत्थाम्नेनमः॰ बलायन॰ व्यासायन॰ हनुमतेन॰
बिभीषणायन॰ कृपायन॰ परशुरामायन॰ कार्त्तिकेयायन॰ जन्मदेवतायेन॰ स्थानदेवतायेन॰
प्रत्यक्षदेवतायेन॰ वासुदेवायन॰ क्षेत्रपालायन॰ पृथिव्येन॰ अद्भ्योनमः तेजसेन॰ वायव्येन॰ आ
काशायन॰॥ इत्यष्टदिग्भागसंपूज्य॥ प्रीयंतांदेवताः सर्वाःपूजागृह्णंतुतामम॥ प्रयच्छंत्वायुरारो
ग्यंयशः सौख्यंचसंपदः॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंमहामुने॥ देयचर्चितंमयादेवपरिपूर्णंत
दस्तुमे॥ इतिपठित्वातिलावपनं। ब्राह्मणाय्यतिहोलेनां देयंद्रव्याणि संपूज्य। कुशत्रयतिलजलान्या
दाय। अघममजन्मदिनेदीर्घायुकामः एतान्तिलान्सोमदेवतान्तंदुलान्यथानामगोत्रायब्राह्मण

प्र॰ग॰त्न

णाय दातुमहमुत्सृजे तत्।। इति वदेत्।। ततो घृताक्ततिलैर्व्याहृतिभिर्यथाशक्ति होमः।। ततः पयसा स
र्वभूते बलिर्नममेति दद्यात्।। ततः तंदुलेभ्यो नम मेति संपूज्य जलेन सिक्त्वांकुराद्यसयवतिलान्या
दाय। अद्य मम जन्मदिने दीर्घायुःकामः एतान् सोपस्करान् तंदुलान् यथानामगोत्राय नाम दातुम
हमुत्सृजेत्।। घृताय नम इति घृतं संपूज्य जलेन सिक्त्वा अद्य मम जन्मदिने दीर्घायुःकाम इदं घृतं प्र
जापतिदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे तत्।। ततः तिलगुडसहितं दुग्धपानं तत्र मं
त्रः।। अंजल्यर्द्धमितं क्षीरं सतिलं गुडमिश्रितं।। मार्कंडेय वरं लब्ध्वा पिबाम्यायुष्यहेतवे।। इति तिल
गुडसहितं दुग्धं पीत्वाचम्य। ॐ मार्कंडेयाय नमः गोभ्यो नमः ब्राह्मणेभ्यो नमः इति प्रणम्य। मार्कंडेय क्षम
स्वेति विसर्जयेत्। अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः।। कृपः परशुरामश्च सप्तैते चिरजीवि
नः।। ग्रंथांतरे तु मंगलस्नानं कृत्वा। कुमुदादिदेवताः संपूज्य यथाशक्ति ब्राह्मणभोजनं दक्षिणा च दत्वा
। सुवासिनीभिर्नीराजितो घृततन्नवस्त्रब्राह्मणीभिस्त्रिसृश्च अपूपपूरिकाः साज्याक्तमुद्गादिश्रीन
ये आयुर्वर्द्धयेच वायनादि दद्यात्।। जन्मऋक्षं देवताप्रीत्यै च दद्यात्। वर्षांतेषु द्रढं वा दत्वं वरोपेटिकासु
मोदकादिखाद्यं निधाय तत्तनवस्त्राच्छादितां पेटिकां जीवत्सु तिपुत्रेभ्यो दत्वा तदाशिरोग्रहीयात्।। इ

दं सर्वे जीवंति मातेः वापत्स्वायुषं खाद्यानि निधाय तत्तनवस्त्रादितां प्रकुर्यात्।। इति वर्द्धापनविधिः।। अ
थ चूडाकरणं।। तत्र कालस्तावत्।। तच्च पूर्वे वर्षे तृतीये वा असंपूर्णे उपनीत्या सह वा यथाकुलाचा
रं चौलकर्म कार्यं। उदगयने शुक्लपक्षे गुरुशुक्रयोर्बाल्यवार्द्धिकास्तमयाभावे अक्षये अनधिके च मसिः
ज्योतिशास्त्रोक्तप्रशस्ततिथिवारनक्षत्रे शुभमुहूर्ते दिने एवं न तु रात्रौ। यद्गिर्भाधानादि संस्कारलो
पस्तदा प्रायश्चित्तं कृत्वा कालातिपत्तिनिमित्तं प्रायश्चित्तहोमं कृत्वा चौलं कार्यं। तदाह भगवान्।। आर
भ्याधानमाचौलात्काले तीते तु कर्मणां।। व्याहृत्याज्यं तु संस्कृत्य हुताकर्मयथाक्रमं।। कार्यमिति शेषः।।
प्रायश्चित्तं च स एवाह।। एतेषु केकलोपेपि पादकृच्छ्रं समाचरेत्।। चौलादर्वाक् प्रकुर्वीत प्रायश्चित्ताद
नंतरं।। अथ प्रयोगः।। ततः बहिःशालाभिमवतितस्मिन्नहनि।। माताकुमारमादाय स्नाप्य अहतेवास
सी परिधाय। पत्युः समीपे संकल्प्यसमयेतिष्ठेत्।। तत्र संकल्पः।। आचम्य प्राणानायम्य मम अस्य कुमार
स्य बीजगर्भसमुद्भवैनोनिबर्हणेन बलायुर्वर्चोभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चौलाख्यं कर्म करि
ष्येति संकल्प्य।। अस्य चूडांगतया विहितं अविघ्नपूजनं मंडपस्थापनं मातृकापूजनपूर्वकं नांदीश्राद्धं
चाहं करिष्ये।। ततश्राद्धं समाप्य अनच्छिष्टपाके नत्रिब्राह्मणान्भोजयेत्। शुभेमुहूर्ते परिसमूहनं।

तं कृत्वा बहिः शालायां पश्चादग्नेरुपविशेत् स्त्री च कुमारसहितः पुनर्देशकालौ स्मृत्वा स्यकुमार
स्य चूडाकरणमहं करिष्ये। तत्र पूर्वं यावद्ब्रह्मोपगमनं। उत्तरेण पात्रासादनं। द्वे पवित्रे। ताम्रमयी
आज्यस्थाली। पालाशास्समिधः। स्रुवं वा घारौ। सम्मिधत्रये। आज्यभागौ। पूर्णपात्रं। दक्षिणा। घृत
पिंडः। सकेशगोमयपिंडस्य गोष्ठे निधाय। एतान्येकल्पिकपदार्थानहं करिष्ये। अथ देवतानिध्या
नं। तत्र प्रजापतिं। इन्द्रं। अग्निं। सोमं। अग्निं। वायुं। सूर्यं। अग्निवरुणा वग्निवरुणौ। अग्निं। वरुणं। स
वितारं। विष्णुं। विश्वान्देवान्मरुतः स्वर्कान्। वरुणं। प्रजापतिं। अग्निं स्विष्टकृत्। एता देवताः आ
ज्येन अस्मिन्चौलकर्मण्यहं यक्षे। ततो ब्रह्मोपवेशनाद्याज्यभागांतं विशेषः। नात्र चरुः। आसादनानंतरं
उपकल्पनीयानि शीतोदकं। उष्णोदकं। घृतपिंडं। त्रेणी शलली। सप्तविंशति कुशतरुणानि ~ ताम्रप
रिष्कृतं आयसक्षुरः। आनडुहं गोमयपिंडः। नापितश्चेति। वरः एतानुकल्प्य। पवित्रे कृत्वा। प्रोक्षणी
संस्कारादि पर्युक्षणांतं कृत्वा। ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। ॐ इंद्राय स्वाहा। इदमिं· ॐ
अग्नये स्वाहा· इदम· ॐ सोमाय स्वाहा· इदं सो· ॐ भूर्भुवस्स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिः क्रमे
ण गायत्र्युष्णिगनुष्टुप्छंदांसि। अग्निर्वायुस्सूर्यो देवता व्याहृति होमे विनियोगः। ॐ भूः स्वाहा। इदम·

ॐ भुवस्स्वाहा। इदं वा· ॐ स्वः स्वाहा। इदं सू·। ॐ त्वंनो अग्ने इति वामदेव ऋषिः त्रि· अग्निवरुणौ दे
वता। होमे विनियोगः। ॐ त्वन्नो अग्ने। इदमग्नीवरुणाभ्यां न मम। सत्वन्न इति वामदेव· बृहती छं
दः अग्निर्देवता· होमे वि·। ॐ सत्वन्नो अग्ने· इदमग्नीव· ॐ अयाश्चाग्न इति वामदे· बृह· अग्नि
र्देवता। होमे वि·। ॐ अयाश्चाग्ने· इदमग्नये अयसे·। येनेशतमिति वा· त्रि· वरुणसवितावि
ष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः होमे· ॐ येते शतं· इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो म
रुद्भ्यः स्वर्केभ्यश्च न मम। ॐ उदुत्तमममिति शुनःशेप ऋषि· त्रिष्टु· वरुणो देवता होमे· ॐ उदुत्त
मं· इदं वरुणायादित्यायादितये च न मम। ॐ प्रजापतये स्वाहा। इदं प्र· ॐ अग्नये स्विष्टकृते स्वा·
इदमग्नये स्वि·। अत्र जयाहोमस्मार्त प्रायश्चित्त होममिच्छंति। संस्रवप्राशनं। पवित्राभ्यां मार्जनं।
पवित्रप्रतिपत्तिः। पूर्णपात्रदानं। ब्राह्मणे चूडाकरणांगतयाविहितं इदं पूर्णपात्रं तुभ्यमहं संप्र
ददे न मम। प्रणीताविमोकः। सीतास्वप्स्थले आसिंचति। उष्णेन वाय इति मंत्रस्य परमेष्ठी ऋ·
षि· प्रतिष्ठा छंदः अग्निर्देवता उदकसिंचने वि·। उष्णेन वाय उदकेने ह्यदितेकेशान्वपेति मंत्रेण।
अथो ष्णोदकमिश्रितासु अप्सु उपकल्पितं घृतपिंडं प्रास्यति। ततः उदकमादाय। दक्षिणं गोदान

प्र॰ग॰ल

मुंडति।सवित्राप्रसूतेतिमंत्रस्यप्र॰गा॰आपोदेवताक्लेदनेविनियोगः।ॐसवित्राप्रसूतादैव्या
आपउंदंतुतेतनूं।दीर्घायुत्वायवर्चसेस्यनेनमंत्रेण।ततःत्रेण्याशलल्याविनीयत्रीणिकुशतरुणां
न्यंतर्दधाति।ॐषधेत्रायस्वेतिप्र॰यजुश्छंदः तरुणास्वधितिर्देवता।कुशतरुणान्यंतर्धाविनियोगः।
ॐषधेत्रायस्वस्वधिते॰ततःताम्रपरिस्कृतमादायक्षुरमादत्ते।शिवोनामेतिप्रजाप॰बृहतीछं
दः क्षुरोदेवता।क्षुरग्रहणेविनियोगः।शिवोनामासि॰संलग्नंकरोति।निवर्तयामीतिप्रजाप॰यर्
जुश्छंदः क्षुरोदेवतासंलग्नीकरणेविनियोगः।निवर्तयाम्यायुषे॰।अनेनमंत्रेणयेनावपदितिमंत्रस्या
लंबायनऋषिःपंक्तिश्छंदः सवितादेवता।केशतरुणछेदनेविनियोगः।ॐयेनावपत्सविताक्षु
रेणसोमस्यराज्ञोवरुणस्यविद्वान्।तेनब्रह्माणोवपतेदमस्यायुष्यंजरदृष्टिर्यथासदितिमंत्रेणस
कुशंकेशद्वयंत्रवोयं छित्वागोमयपिंडेप्रक्षिप्य।ततस्तस्मिन्नेवदक्षिणेगोदानेएवमेवापरंवारद्व
यंतूष्णींकर्मकर्तव्यं।तत्रोदकमादायोंदनं।त्रेण्याशलल्याविनियनं।कुशतरुणत्रयोंतर्दधानं।क्षुरं
निधानं।गोमयपिंडेप्राशनं।एवंदक्षिणगोदानेवारद्वयंकृत्वा।पश्चिमगोदानेपूर्ववदुंदनादिकर्मकु
र्यात्।ततःक्षुरदानमंत्रत्वात्।केशछेदनेमंत्रविशेषः।कश्यपस्येतिनारायणऋषिःउष्णिक्छंदः आ

ग्नीर्देवताछेदनेविनियोगः।ॐकश्यपस्य॰ततःपूर्ववत्तूष्णीं।पुनर्वारद्वयंकर्मकुर्यात्।उत्तरगोदाने
पूर्ववदुंदनादि।अत्रापिकेशछेदनेमंत्रविशेषः।येनभूरिश्चरातिमंत्रस्यवामदे॰यजुश्छंदः क्षुरोदे
वता।छेदनेवि॰।येनभूरिश्चरादिवंज्योक्चपश्चाद्धिसूर्यं।तेनतेवपामिब्रह्मणाजीवातवेजीवना
यसुश्लोक्यायस्वस्तयइति।अत्रापिवारद्वयंतूष्णींमुंडनादिकर्मकुर्यात्।ततस्त्रिःक्षुरेणशिरःप्रद
क्षिणंपरिहरति।यत्क्षुरेणेतिमंत्रस्य॰वामदे॰यजुश्छं॰क्षुरोदेवताक्षुरभ्रमणेवि॰।यत्क्षुरेणमज्ज
यतासुपेशसावप्तावापति।केशांश्छिंधिशिरोमास्यायुःप्रमोषीः।इत्यनेनएवंत्रिस्तूष्णीं।तत
स्त्रिनेवोदकेनसर्वंशिरःआर्द्रीकृत्वाक्षुरोनापितायप्रयच्छति।अक्षण्वमितिमंत्रस्यवामदेव॰यर्
जुश्छंदः क्षुरोदेवः क्षुरदानेवि॰।अक्षण्वन्परिवपेति।सचनापितःउदङ्मुखस्थितस्यबालकुमारस्य
यथोक्तंकेशशेषंकरोति।यस्यगोत्रेयदिचित्तंवशिष्ठानांदक्षिणभागेशिखाकर्तव्या।आत्रेयाणांक
कश्यपानांचउभयत्रदक्षिणोत्तरभागे।अंगिरसानांपंचशिखा।भृगूणांशिखारहितंमुंडनं।एवं
केशानुप्तासकेशंगोमयपिंडंअनुगुप्तंगोष्ठेनिधाय।पल्वलोदकांते।चूडाकरणकर्तास्वाचार्याय
वरंददाति।नरिदक्षिणांदत्वा।ब्राह्मणेभ्योदशसंख्याकेभ्योभोजनंसंकल्प्यः।कर्मसंपूर्णतांवाचयत्वा।

अ·ग·ल

यस्यस्मरस्येस्फुरंक्षा।आश्विश्रगे ब्राह्मणोक्ताः स्वयंकुमारश्चगृह्णीयात्।एतत्सर्वं कुमार्या अप्यमंत्र
कं।होमस्तु समंत्रक इतिमध्यशिरसि चूडास्यात्।वशिष्ठानांतु दक्षिणे।उभयोः पार्श्वयोरत्रिकश्य
पानांशिखामतः॥शिशोर्मातरि गर्भिण्यां चूडाकर्म नकारयेत्॥पंचमाब्दादूर्ध्वंतु गर्भिण्यामपिकारये
त्॥सहोपनीत्या कुर्याच्चेत्तदादोषो नविद्यते॥चूडाकर्मनकर्तव्यं यस्यमातास्तिगुर्विणी॥करोतियदि मंदा
त्मा तदा गर्भस्य नाशयेत्॥पित्रोर्मृतिवर्द्धसेके चतुर्थांतरे स्फुटं॥वशिष्ठसंहितामपि॥पुत्रचूडाकृ
तो माता गर्भिणी यदि वा भवेत्॥विपद्यते गुरुस्तत्र दंपति श्चतुरब्दतः॥गर्भे मातुरकस्या नकुर्याच्चो
लकर्मसु॥पंचमासादधः कुर्यात्तदूर्ध्वं नकारयेत्॥अन्यत्रापि॥शिशोर्मातरि गर्भिण्यां मौंजी चू
डा नकारयेत्॥गते तु पंचमे मासे गर्भादौ नास्ति र्भवेत्॥जगन्मोहिनोपि॥गर्भिण्यां मातरि शि
शौ चौलं सूनोर्न कारयेत्॥गर्तांतिकेप्येवंस्यात्काले वर्द्धव्रतेषपिती॥इदं चूडाकरणं पंचमाब्दा
त्प्राक् मातरि गर्भिण्यां कार्यं॥तदाह ज्योतिर्नारदः॥शिशोर्मातरि गर्भिण्यां चूडाकर्म नकारयेत्॥पं
चमाद्वितिपंचाब्दात् तदनंतरं उपनयनेन सह करणपक्षे चन दोषः॥अथोर्ध्वं तु गर्भिण्यामपि कार
येत्॥सहोपनीत्या कुर्याचेत्तदा दोषो न विद्यते॥इति वाक्यं विशेषात्॥ग. सपरिशिष्टेपि॥माताकु २५

मारमाद्याये स्फुटं क्षा सायना दिभिः॥माता चेद्यदि गर्भा स्यात्तदा चौलं न कारयेत्॥इति श्रोडषकर्म
पद्धतौ चूडाकरणः समाप्तः॥अथ कर्णवेधः॥वर्षे तृतीये पंचमे वा ज्योतिःशास्त्रोक्त मासशुक्लपक्ष
तिथिवारनक्षत्रादिशुभकाले हरिचित्रारेवतीषु पूर्वाह्ने विष्णुब्रह्म रुद्रचंद्र सूर्यादिगिरिशान्व्यास
सरस्वती कुलदेवता गो ब्राह्मणान्यथाविभवं संपूज्य। कुमारं प्राङ्मुखमुपवेश्य दक्षिणा कर्ण समभि
मंत्रयते।भद्रं कर्णेभिरितिमंत्रस्य प्रजाप·त्रि·लिंगो· कर्णमभिमंत्रणे वि·भद्रं कर्णेभिः य दायुरिति॥
ततः सव्यं करणमभिमंत्रयते।वक्ष्यंवेदितिमंत्रस्य प्र·त्रि·लिं· कर्णमभिमंत्रणे वि·।वक्ष्यंवेदितिमंत्रः।
तस्य शिशोः कर्णयोर्वेध्यस्थलमलक्तकरसेनांकयित्वा यथाविभवं सुवर्णरौप्यताम्रलोहसूच्यां
मांगलिपद्यादिसूत्रोपेतया सौचिकेनान्येन वा कुशेन सुनगास्त्रिया वा कुमारस्य मधुरं दत्वा कर्णौ
वेधयेरन्नाह्नते सूर्यरश्मिपारस्थलेगण्यादोपित्रादि कुमारस्य पूर्वं दक्षिणं कुमार्यास्तु पूर्वं वामः॥
कर्णवेधः॥वेधनक्षत्रात्तृतीय नक्षत्रे कर्णप्रक्षालनं उष्णवारिणा रोहणार्थं कार्यं॥रूढौ च कर्णौ
यथा नरणं क्षमता भवति॥यथा वर्द्धनीयौ॥पुंसः सूर्यरश्मिप्रवेशायोग्यं रंध्रपर्यंतं वर्द्धयेत्॥लंबक
र्णत्वं निषिद्धं स्त्रीणां यथेच्छयं॥इति कर्णवेधः॥अथ विद्यारंभः॥मदनपारिजात मार्कंडेयः॥प्रा

प्र॰ग॰ल॰

य पंचमे वर्षे अचिसुप्ते जनार्दने ॥ षष्ठिं प्रतिपदं चैव वर्जयित्वा तथाष्टमी ॥ रिक्तां पंचदशीं चैव सौरिभौम
दिने तथा ॥ एवं सुनिश्चिते काले विद्यारंभं तु कारयेत् ॥ पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं ॥ ८
स्वविद्यासूत्रकारांश्च स्वस्वविद्यां विशेषतः ॥ विशेषतस्तु तन्नाम्ना एतेषामेव देवानां नाम्ना तु जुहुया
दघृतं ॥ दक्षिणाभिर्द्विजेन्द्राणां कर्तव्यं चात्र पूजनं ॥ प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुं ॥ अ
ध्यापनं च प्रथमं द्विजाशीर्भिः प्रपूजनं ॥ ततः अनध्यायान्वर्जनीयान्विसर्जयेत् ॥ अथ प्रयोगः ॥
शुभलग्ने शुभदिने गणपत्यादीन्संपूज्य । हरिं ध्यात्वावाह्य ॐ हरये नमः इति पाद्यादीनां प्रपूजयेत् ॥
एवं लक्ष्मीं सरस्वतीं च संपूज्य । स्वस्वाभिमतविद्यासूत्रकारान् । स्वाभिमतविद्यां च पूजयेत् ॥ यथा
पाणिनिव्याकरणं । सर्ववर्माणं । कलापं । नारदं । शिक्षां । लापयुन । कात्यायनादि । स्वस्वकल्पसूत्रकारं क
ल्प । यास्कं निरुक्तं । पिंगलं छंदः । सूर्यं ज्योतिषं । ऋग्वेदं यजुर्वेदं सामवेदं अथर्वणवेदं । व्यासपुराणं । गो
तमन्यायं । कणादं वैशेषिकं । कपिंजलसांख्यं । पातंजलीपातंजलीं । जैमिनीमीमांसा । व्यासं वेदांतं । मृ
धर्मशास्त्रं । गोभिलं । पारस्कारादि । स्वस्वगृह्यसूत्रकारगृह्यं ॥ अग्निवेशआयुर्वेदं । भारद्वाजं धनुर्वेदं ।
भरतगांधर्ववेदं । विश्वकर्माणं स्थापत्यं । बृहस्पति । अथर्ववेदशास्त्रं । अग्निं संस्थाप्य । ब्रह्मोपवेश

नाद्याज्यभागांतं कृत्वा । आदरयेन नमः । इत्यादिना घृतं हुत्वा महाव्याहृत्यादि स्विष्टकृतं जुहुयात् । त
त तत्र समाप्य । ब्राह्मणेभ्यो दक्षिणां दत्वा तेः कृतात् शिष्यं बालकं प्रत्यङ्मुखं स्वयं प्राङ्मुखं स्वस्ति
वाचनपूर्वकं वाचयेत् ॥ इति विद्यारंभ कठिनीदान विधिः ॥ अथोपनयनं ॥ गर्भाष्टमे अष्टमे वाब्दे का
र्यं । तत्र मनुः । ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमः ॥ विष्णुः । षष्ठे तु धनकामस्य विद्याकामस्य
सप्तमेः ॥ अष्टमे सर्वकामस्य नवमे कांतिमिच्छतः ॥ तथा संग्रहे ॥ सप्तमे वाष्टमे वर्षे नवमे दशमे त
था ॥ एकादशे द्वादशे वा उपनीय द्विजातयः ॥ ब्रह्मवर्चसमायुष्यं तेजो नाद्यं तथेंद्रियां ॥ पशून्काम ८
यमानो वै प्राप्नुवंति यथाक्रमं ॥ अथर्वणसूत्रे ॥ अथ ब्रह्मचारी कस्मा गर्भपंचमेब्दे ब्राह्मण उप
नीयतः ॥ गर्भाष्टमे वा राजन्यं गर्भद्वादशे वैश्यं ॥ षोडशे वा विंशति श्च यति ता विद्धकालान्भवं
ति ॥ ब्राह्मणक्षत्रियविशां विद्ध कालो व्याख्यातः ॥ वाराहसूत्रे विशेषः ॥ गर्भाष्टमेषु ब्राह्मणमुप
नयेत् । षष्ठे ष्टमे पंचमे वा ॥ ततो गर्भेकादशेषु क्षत्रियं । गर्भद्वादशेषु वैश्यमिति ॥ नृसिंहः ॥ उ
त्तरायणगे सूर्ये कर्तव्यं ॥ तोपनयनं ॥ श्रुतिः । वसंते ब्राह्मणमुपनीयतः ॥ वराहः । माघादिपं
चमासेषु मेखलाबंधनं शिशोः ॥ ज्येष्ठमासेन ज्येष्ठस्य जन्ममासेन सर्वेषां ॥ शुक्लपक्षे द्वितीया ८

दिस्वाध्यातिथिषुनानाध्यायेननैमित्तिकानध्यायेषूर्वान्हेषु न कालेउपनयनंकार्यं॥उपनय
नेक्रममाह॥गार्ग्यः॥पितामातामहोभ्राताज्ञातयोगोत्रजाग्रजः॥उपनयनेधिकारस्यात्पूर्वा
भावेपरःपरः॥तथाच॥पितैवोपनयनेस्यात्तदभावेपितुःपिता॥तदभावेपितुर्भ्राता तदभावेतु
सोदरः॥अधिकारसिद्ध्येप्रायश्चित्तमाह॥वृद्धविष्णुः॥कृच्छ्रत्रयंचोपनेतात्रीन्कृच्छ्रांश्चबटुश्चरेत्॥
आचार्योद्वादशसहस्रंगायत्रींजपेत्॥तथाच।नांदीश्राद्धेकृतेपश्चादनध्यायस्त्वकालिकाः॥मौंजी
बंधेतदाकुर्याद्विदारंभंनकारयेत्॥अकालिकगर्जनीघातादितिनिमित्तिकाः॥इत्युपनयनोप
युक्तविचारः॥अथोपनयनपद्धतिः॥तत्रदेशकालौस्मृत्वाममास्यकुमारस्यद्विजत्वसिद्ध्यर्थंवे
दाध्ययनाधिकारार्थंचोपनयनमहंकरिष्ये।तदंगत्वं अद्यगणपतिपूजनपूर्वकंस्वस्तिवाचन
पूर्वकंअविघ्नपूजनमंडपस्थापनमातृकापूजनपूर्वकंनांदीश्राद्धंकरिष्ये॥उपनयनेनसहचौ
लकर्मचेत्तदपिसंकल्पेकीर्तयेत्।तंत्रेणअविघ्नपूजनंमंडपस्थापनंनांदीश्राद्धादिनिकुर्यात्॥
अविघ्नपूजनादिकंसमाप्य।अथपरेद्युः॥कृतनित्यक्रियः॥कृतमंगलस्नानमलंकृतंकुमा
रमुपवेश्यदेशकालौस्मृत्वास्यकुमारस्योपनयनंकर्तुंतस्याभ्यांगत्वेनवपनमहंकरिष्ये॥

इतिसंकल्प्य॥वपनंकारयेत्॥ततोब्राह्मणभोजनत्रयं॥ततःस्नातोमुंडितशिरएवबटुर्भुंक्ते॥ब
हिःशालायांपंचभूसंस्कारान्कृत्वालौकिकाग्नेःस्थापनं।ततःपुष्पमालादिभिरलंकृतबटुमु
हूर्तिकोक्तशुभमुहूर्तेआचार्यपुरुषाःआचार्यसमीपमानयंति॥ततःआचार्यआनीतकुमा
रःअग्नेःपश्चात्स्वदक्षिणतोवस्थाप्य।उदग्ग्रमुखमितिरेणुः।तत्रावसरेआशीर्मंत्रान्पठेयुः
ब्रह्मचर्यमागामितिब्रूयात्।आचार्योवदति।कुमारंप्रति।ब्रह्मचर्यमागामितिकुमारोब्रूयात्॥ब्र
ह्मचार्यसानीसाचार्योवदति।ब्रह्मचर्यसानीतिमाणवकः।अथैनंकुमारंआचार्योवासःपरिधा
पयति।येनेंद्रमितिमंत्रस्यअंगिराऋषिःबृहतीछंदःवासोदेवतावस्त्रपरिधानेवि॰येनेन्द्राय
बृहस्पतिर्वासःपर्यदधादमृतं॥तेनत्वापरिदधाम्यायुषेदीर्घायुत्वायबलायवर्चसइत्यनेनमं
त्रेण।आचार्यस्यमंत्रपाठः।ततःआचार्योमाणवकस्यकटिप्रदेशेमेखलांप्रदक्षिणांत्रिर्वेष्ट
स्तायथाग्रवरग्रंथितांमेखलांबध्नाति।इयंदुरुक्तमितिमंत्रस्यवामदेवऋषिःत्रिष्टुप्मेख
लादेवतामेखलाबंधनेवि॰।इयंदुरुक्तंपरिबाधमानावर्णंपवित्रंपुनतीमआगात्॥प्राणापा
नाभ्यांबलमादधानास्वसादेवीसुभगामेखलेयमितिकुमारस्यमंत्रपाठः॥ततःयज्ञोपवीतमि

प्र.ग.ल

यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामीति॥

ति मंत्रस्य परमेष्ठी ऋषिः त्रि. लिं. श्रौतस्मार्तनित्यकर्मानुष्ठानफलसिद्ध्यर्थं उपवीतधारणे
वि.। यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं
बलमस्तु तेजः॥ इति माणवकः॥ ततः उक्तविधिना द्विराचम्य॥ एनेय स्याकृष्णाजिनस्योत्तरीयत्
त्वं माणवकस्य परिधानं॥ ष्यंगुलं बर्हिर्लोमयष्टास्याश्चतुरंगुलं॥ एकखंडं त्रिखंडं वा चतुर्विंशा
ष्ट्र्योउत्र। मित्रस्य चक्षुरिति केचित्॥ मित्रस्य चक्षुरिति मंत्रस्य परमेष्ठी ऋषिः त्रि. लिं. अजि
नधारणे वि.। मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वी स्थविरं समिद्धं॥ अनाहनस्यं वसनं
जरिष्णुः परीदं वाज्यजिनं दधेहमिति माणवकः॥ ततः आचार्यो दंडं प्रयच्छति। माणवकः प्रतिगृ
ह्णाति। यो मे दंड इति मंत्रस्य प्रजापति ऋषिः यजुश्छंदः दंडो देवता दंडग्रहणे वि.। यो मे दंडः परापत
त्त्वैहायसोधि भूम्यां॥ तमहं पुनराददे आयुषे ब्रह्मणे ब्रह्मवर्चसायेति। दीक्षावत्। एके दंडं प्र
तिग्रहणमिच्छंति॥ अथाचार्यः। स्वकीयमंजलीं जलेन पूरयित्वा तेन जलेनांजलिस्थेन माण
वकस्यांजलिं पूरयति। आपो हिष्ठेति त्र्यृचस्य सिंधुद्वीप ऋषिः गायत्री. आपो देवता उदकसेके
वि.। आपो हिष्ठा मयोभुवः यथा च नः स्वं ते स्त्रिभिर्मंत्रैः ३ आचार्यो माणवकं प्रेषयति। सूर्यमुदी २९

दाम्पा ८

क्षते। तच्चक्षुरिति मंत्रस्य दध्यङ्ङाथर्वण ऋषिः ब्राह्मी त्रिष्टुप् छंदः सूर्यो देवता सूर्यदर्शने वि. तच्च
क्षुः ततः आचार्यो माणवकस्य दक्षिणस्कंधस्योपरि हस्तं नीत्वा माणवकस्य हृदयमालभते। मम
व्रतेति मंत्रस्य प्र. त्रिष्टुप्. बृहस्पतिर्देवता हृदयालंभने वि.। मम व्रते ते हृदयं दधामि। मम चित्तम
नु चित्तं ते अस्तु। मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं॥ इत्याचार्यस्य मंत्रपाठः॥
५ण कुमारस्य दक्षिणहस्तं गृहीत्वा को नामासीत्याचार्यो ब्रूयात्। एवं पृच्छति। कुमारः प्रब्रूयात्। अमुकशर्माहं
हं नो इति। पुनराचार्यः पृच्छति माणवकं। कस्य ब्रह्मचार्यसीति। न वक्तव्यमानेन कुमारेण। इन्द्र
स्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवामुकशर्मन्नित्याचार्यः पठेत्। अथैनं कुमारमाचार्यः
भूतेभ्यः परिददाति। प्रजापतये त्वादीनां प्रजापति ऋषिः यजुश्छंदः लिंगोक्ता देवता रक्षणे वि.॥ ॐ प्र
जापतये त्वा परिददामि। ॐ देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां
त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इति॥ अथ
कुमारस्य अग्निं प्रदक्षिणीकृत्याचार्यस्योत्तरत उपविशति॥ अथ वैकल्पिकावधारणं॥ पूर्वेण ब्र
ह्माणोगमनं। उत्तरेण पात्रासादनं। द्वे पवित्रे। ताम्रमयी आज्यस्थाली। पालाशाः समिधः। प्रोक्षा

प्र॰ग॰त्र

वाघारौ। समिधन्नमे आज्यभागौ। पूर्णपात्रं। दक्षिणा। अग्नेरुत्तरत आसीनाय। गायत्र्युपदेशः। अ-
ग्नेस्समिंधनिनिसमिधाधानं। प्रथमाभिक्षामातुः। अन्याअपरिमितामौनं। एनान्येकल्पिकपदार्थानहं
यक्षे। ततो देवताभिधानं। तत्र प्रजापतिं। इन्द्रं। अग्निं। सोमं। अग्निं वायुं। सूर्यं। अग्निं वरुणा वग्निवरुणौ।
अग्निं। वरुणं। सवितारं। विष्णुं। विश्वान्देवान्मरुतः स्वर्कान्। वरुणमादित्यादितिं प्रजापतिं। अग्निं स्विष्टकृ
तं। एता राज्येनाहं यक्ष्ये। ततो ब्रह्मोपवेशनादि पर्युक्षणांतं कर्म कृत्वा ब्रह्मणान्वारब्धः स्रुवेणाहोमः॥ आ
घारावाज्यभागौ च हुयात्। ॐ प्रजापतये स्वाहा इदं प्र॰ ॐ इन्द्राय॰ इदमिं॰ ॐ अग्नये॰ इदम॰ ॐ सोमय॰
इदं सो॰ ॐ भूर्भुवस्वरिति महाव्याहृतीनां प्रजापति ऋषिः ऋमेणागायत्र्युष्णिगनुष्टुप् छंदांसि। अ
ग्निर्वायुः सूर्यो देवता उपनयनहोमे विनियोगः। ॐ भूः स्वाहा इदम॰ ॐ भुवः स्वाहा। इदं वाय॰ ॐ स्वः स्वाहा इ
दं सूर्याय॰। ॐ त्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टु अग्नीवरुणौ देवता उपनयनहोमे वि॰ ॐ त्वन्नो अ
ग्ने॰ स्वाहा इदमग्नीवरुणाभ्यां न मम। ॐ सत्वन्नो अग्न इति वा॰ त्रि॰ अग्निवरुणौ देवता उपनयनहो॰
ॐ सत्वन्नो अग्ने॰ स्वाहा इदमग्नीवरुणाभ्यां॰ ॐ अयाश्चाग्न इति वा॰ बृहती॰ अग्निर्दे॰ उ॰ हो॰ ॐ
अयाश्चाग्ने॰ स्वाहा इदमग्नये अयसे न मम। ॐ ये ते शतमिति मं॰ वा॰ त्रि॰ वरुणसविता वि

२९

॥अत्रजयहोमस्मार्त्तप्रायश्चित्तहोमाविच्छंति। ततः९

ष्णुर्विश्वेदेवामरुतः स्वर्का देवताः उ॰ हो॰ ॐ ये ते शतं॰ स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो
देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम। ॐ उदुत्तमममिति मं॰ शुनःशेप ऋषिः त्रि॰ वरुणो देवता उ॰ हो॰
ॐ उदुत्तमं॰ स्वाहा॰ इदं वरुणायादित्यायादितये न मम॥ ॐ प्रजापतये स्वाहा इदं प्रजापत॰ ॐ अ
ग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम॥ संस्रवप्राशनं। पवित्राभ्यां मार्जनं। अग्नौप
वित्रप्रतिपत्तिः। पूर्णपात्रदानं। ब्रह्मन्नुपनयनां गभूतया विहितं भि दं पूर्णपात्रं तुभ्यमहं संप्रददे॥
प्रणीताविमोकः। अग्नेरलंकरणं। अथैनं ब्रह्मचारिणं आचार्य [illegible]स्ति ब्रह्मचार्यसानीति आ
चार्यो वदति। असानी सार्द्ध कुमारः। आपोशानेसाचार्यः। अश्नानीस्यार्द्ध कुमारः। कर्म कुर्वीसा
चार्यः करवाणीति ब्रह्मचारिः। मादिवासुषुप्थाः इत्साचार्यः। न स्वपामीति ब्रह्मचारिः। वाचंयच्छे
त्साचार्यः। यच्छानीति ब्रह्मचारिः। समिधमाधेहीत्साचार्यः। आदधानीति ब्रह्मचारिः। आपोशाने
साचार्यः। अश्नानीति ब्रह्मचारिः। अथास्मै ब्रह्मचारिणे सावित्रीं तत्साचार्यः। कथं न्वेताय ब्रह्मचारि
णे दक्षपेक्षया। उत्तरतोऽग्नेर्प्रवस्थिताय प्रत्यङ्मुखोपविष्टाय पादोपसंग्रहपूर्वकमुपसन्नाय आ
चार्यसमीक्षमाणाय स्वमपि समाहिताय ब्रूयादाचार्यः। गायत्र्युपदेशः। अथ ॐकारव्याहृतिपू

प्र॰ग॰त्न

र्वकं प्रथमपादः। द्वितीयार्धर्चं सः। तृतीयं सर्वां सह पठनं आचार्यो दक्षिणकर्णे ब्रूयात्।
अत्रावसरे ब्रह्मचारिणा समिधाधानं। तत्र प्रथमं गावत्संधुक्षणं। संधुक्षणमिंधनं प्रक्षेपाव
क्षमाणैः पंचभिर्मंत्रैः कार्यः। अग्ने सुश्रव इत्यादीनां पंचमंत्राणां ब्रह्मा ऋषिः सर्वाणि यजूंषि
षि छंदः अग्निर्देवता समिधाधाने विनि॰। अग्ने सुश्रवः सुश्रवः सम्मां कुरु। यथा त्वमग्ने सुश्र
वः सुश्रवा असि। एवं मां सुश्रवः सौश्रवसं कुरु। यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि।
एवमहं मनुष्याणां यज्ञस्य निधिपो भूयासं स्वाहेति मंत्र आदधाति। एके तु सुश्रवः। एवं मा
सुश्रवः। एवमहं मनुष्याणामित्येभिस्त्रिभिर्मंत्रैः अग्निसंधुक्षणमिच्छंति। ततः प्रदक्षिणमग्निं
पर्युक्ष्योत्थाय समिधमादधाति। अग्नये समिधमिति मंत्रस्य प्रजा॰ आकृतीछंदः समिद्देवता समिधा
धाने वि॰। अग्नये समिधमहार्षं बृहते जातवेदसे॥ यथा त्वमग्ने समिधा समिध्यसे एवमहमायु
षा मेधया वर्चसा प्रजया पशुभिः ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनि
राकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहेत्यनेन मंत्रेण। एवं द्वितीयं। अने
नैव तृतीयं। एषा त्रय इति वा समिधाधानमंत्रः। मंत्रसमुच्चयो वा। तत उपविश्य। पूर्ववदग्निं सुश्र ३॰

सर्वाणि

वइत्यादिभिर्मंत्रैरग्निं संधुक्ष्य पर्युक्षणं कृत्वा। ततस्तूष्णीं पाणी प्रतप्य। वक्ष्यमाणैः सप्तभिर्मंत्रैः प्र
तिमंत्रं मुखविमार्जनं। तनूपा इति सप्तमंत्राणां बृहस्पतिर्देवी ऋषयः यजूंषि छंदः अग्नि
र्देवता। मुखविमार्जने वि॰। तनूपा अग्नेसि तन्वं मे पाहि। आयुर्दा अग्नेस्यायुर्मे देहि। वर्चोदा अ
ग्नेसि वर्चो मे देहि। अग्ने यन्मे तन्वा ऊनं तन्म आपृण। मेधां मे देवः सविता आदधातु। मेधां मे देवी
सरस्वती आदधातु। मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ। इत्येभिर्मंत्रैः। अत्र त्रिः ष्टाचारात्॥ प्रा
णाः केचिन्न पदार्था लिख्यंते। अंगानि च म आप्यायंतामित्यादिमंत्राणां प्रजापतिऋषिः यजुः
लिंगोक्ता देवता अंगालंभने वि॰। अंगानि च म आप्यायंतामिति सर्वांगालंभनं। वाक् च म आप्या
यंतामिति मुखालंभनं। प्राणश्च म आप्यायंतामिति नासिकालंभनं। चक्षुश्च म आप्यायंतामि
ति चक्षुरालंभनं। श्रोत्रं च म आप्यायतामिति दक्षिणश्रोत्रं। ततो तेनैव मंत्रेण वामश्रोत्रालंभ
नं। यशोबलं च म आप्यायंतामिति मंत्रेण मात्रं। ततः कश्यपस्येति नारायण ऋषिः उष्णिक्
छं॰ भस्मना तिलकधारणे वि॰। त्र्यायुषं जमदग्नेः भस्मना ललाटे ग्रीवायां दक्षिणांसे हृदि च
त्र्यायुषमिति प्रतिमंत्रं। ततो गोत्रनामपूर्वकं वैश्वानरादिनामभिवादनं॥ तद्यथा॥ काश्यपगो

ग्रः काश्यपावत्सारनैध्रुवेति त्रिः प्रवरः अमुकामुकशर्माहं भोवैश्वानर अभिवादयामि एवंवरु
पा आचार्य अभिवादयेगुर्वादि। आयुष्मान्भवसौम्य श्रीधरशर्मन्भो इति प्रत्यभिवादयेत्। तत्रपित्रा
द्यभिवादनविधिः। निर्योक्तानेन वामदक्षिणपाणिना दक्षिणपादं गृहीत्वातादृशं वामेन वामं शिरः
पादयोर्निदध्यात्। अत्रभिक्षाचर्याचरणं। तेत्र भवति भिक्षान्देहीति सत्का ब्राह्मणो भिक्षामाचयेत्॥
भिक्षां भवति देहीति क्षत्रियः। भिक्षां देहि भवतीति वैश्यः। यत्र प्रत्याख्यानं कुर्वंति। तत्र भिक्षा
र्थं गच्छेत्। तिस्रो वाभिक्षा ग्राह्याः। षट् द्वादश। अपरिमिता वा मातुः सकाशात् प्रथमं भिक्षार्थं याचेत्।
एके आचार्यान्यन्ते एवं यथोक्तं भिदित्वा आचार्याय निवेदयेत्। अनुज्ञया चार्यानुज्ञाता भिक्षां कु
र्यात्। वाग्यतो हः शेषमासीत। स्वयंप्रशीर्णाः समिध आहृत्यास्तमिते वह्नौ नेवापरिसमूहना
दि आयुष्करणांतं समिदाधानं पूर्ववत्कुर्यात्। ततो वाग्विसर्गो वा इत आरभ्य ब्रह्मचर्यस्य अस
मासे ब्रह्मचारिणो नियमः कथ्यते॥ अधः शायीस्यात्। अक्षारलवणाशी स्यात्। दंडधारणं कार्यं।
अरण्यास्वयंप्रशीर्णाः समिध आहृत्य सायं प्रातः संध्योपासनं कृत्वोपरिसमूहनाद्युक्तप्रकारेण २१
अग्निपरिचरणं कुर्यात्। गुरुशुश्रूषा कर्तव्या। स्वाध्यायाविरोधेन सायंप्रातर्भिक्षा भोजनार्थं कुर्यात्।

मधुमांसाशनं न कर्तव्यं। भोजनं न कर्तव्यं। ऊर्ध्वतो दकेन स्नायादित्यर्थः। आसनस्योपरि मस्तूरका
द्युपधानं कृत्वा रोपविशेत। स्त्रीणां मध्ये अवस्थानं न कार्यं। अदत्तं न गृह्णीयात्। चोरं न कुर्यात्। अनृ
तं न वदेत्। समस्तं तरोक्ताश्च नियमा अनुष्ठेयाः। यस्यैवमध्यं च सायं श्वचारः वेदमयोपरिशिष्टितव्यः।
सोष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत्। अस्मिन्पक्षे चतुर्णामपि वेदनामेकएवव्रतादेशः। सर्वेश्च
वेदाहुतयो होतव्याः। स्वशाखापूर्वकं पठनमपि प्रथमं स्वशाखायाः। द्वादशवर्षतया एकैकस्य ब्रह्म
चर्यं चरेत्। अस्मिन्पक्षे वेदारंभकाले एव वेदाहुतयो होतव्याः। पृथक् पृ॰ कृ॰। यावत्काले तवेदग्रह
णे समर्थस्तावत्कालमेकैकस्य वेदस्य ब्रह्मचर्यं चरेत्। ब्राह्मणस्य ब्रह्मचारिणाः। शैषेणमयं ब्रह्मसोवने
तिपरिधानीयं। क्षत्रियस्य क्षौमं आतसरमित्यर्थः। आविकं वैश्यस्य। ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य
हरिण्याश्चर्मेत्यर्थः। रौरवं चर्म राजन्यस्योत्तरीयं। आजं गव्यं वा चर्म वैश्यस्योत्तरीयं। एणेयादि चर्माभावे
यं सर्वेषामेव ब्राह्मणादित्रिवर्णानामेव चर्मोत्तरीयं भवति। मौंजीरशना ब्राह्मणब्रह्मचारिणः। धनुर्ज्या धनुर्गुणो
राजन्यस्य। मौर्वी वैश्यस्य। केशसंमितः पालाशो ब्राह्मणस्य दंडो भवति। ललाटमिति बैल्वो राज॰
न्यस्य। घ्राणमिति। औदुंबरो वैश्यस्य। सर्ववासं वैषां ब्राह्मणादीनां अति येमेन दंडा भवति॥ आ

चार्येनाहूतः सन् उत्थाय प्रतिवचनं ददाति। ब्रह्मचारी न शयदशायां ब्रह्मचारिणमाहूय स्वाचार्यः
तदा उपविश्य प्रतिवचनं ददाति। आसीनं उपविष्टं चेदाहूतिं यो तदा तिष्ठन् प्रतिवचनं दद्या-
त्। तिष्ठन्तं चेदाहूयति। तदा अभिमुखेन अतिक्रामन् प्रतिवचनं दद्यात्। अतिक्रामंतं चेदाहूयति
तदा आचार्यं अभिमुखेन धावति प्रतिशृणुयात्। यथोक्तः ब्रह्मचारिणः फलमाह। स एवं वर्तमानो अ-
मुत्राधवसत्युत्राधवसतीति। तस्य स्नातकस्य कीर्तिर्भवति। त्रयः स्नातका भवंति। विद्यास्नातको
व्रतस्नातको विद्याव्रतस्नातक इति। समाप्य वेदं असमाप्य व्रतं यः समावर्तते विद्यास्नातक इति॥
समाप्य व्रतं असमाप्य वेदं यः समावर्तते स व्रतस्नातक इति। उभयं वेदं च समाप्य यः समावर्तते स
विद्याव्रतस्नातक इति। व्रतशब्देनात्र एकैकस्य वेदस्य द्वादशवार्षिकं ब्रह्मचारी व्रतचरणमुच्यते॥
अर्वाक् षोडश दर्शात् ब्राह्मणस्यानतीत एव कालो भवति उपनयनस्य। द्वात्रिंशद्राजन्यस्य। चतु-
र्विंशद्वैश्यस्य। अत ऊपनीतो ब्राह्मणः षोडशवर्षे उपनीतस्य सावित्रिका भवंति। द्वाविंशो राजन्यः। च-
तुर्विंशो वैश्यः। पतितसावित्रिका भवंति। तत ऊर्ध्वं नैनानुपनयेयुः। नाध्यापयेयुः।
न याजयेयुः। नैभिः सह व्यवहरंनिति। यस्य कर्मणो यः काल उक्तः तं दृतिक्रम्य अनादिष्टप्रायश्चि

त्तं कृत्वा तत्कर्म कर्तव्यं। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः स्वाहा। त्वं नः। स त्वं नः। अया
श्चाग्ने। एते शतं। उदुत्तममिति। अनादिष्टप्रायश्चित्तं। नात्र ब्रह्मोपवेशनादिकं कर्तव्यं। किंतु पूर्णाहुतिवदा-
ज्यसंस्कारः कर्तव्यं। निरूप्याज्यं। अग्नावधिश्रित्य स्रुवं दर्भैः समृज्य। द्वास्यां स्रुचः … तो दाज्ये-
स्रुवमापूर्य तदुपर्यक्तां समिधमाधाय … तिष्ठन् समिधोभ्याधाय स्रुवेण जुहुयात्। कालातिक्रमं मुक्त्वा
अन्यस्मिन्नपि कर्मापपाते एतदेव प्रायश्चित्तं भवति। त्रिपुरुषं पतितसावित्रीकाणां अपत्यसंस्कारे
अध्यापनं चैतेषां न भवति। तेषामध्येयः। संस्कारमिच्छंते सः ब्रह्मस्तोमेनेष्ट्वा व्यवहार्यो भवति॥ एव
प्रयोगः। स्वकालकृतपूर्वसंस्कारस्य असंस्कृतस्य तु विशेष उच्यते। उपनयनपूर्वदिने बटुना-
सह मंगलस्नातः। प्राणानायम्य तिथ्यादि संकीर्त्य मम अस्य कुमारस्य गर्भाधान पुंसवन सीमं-
तोन्नयन जातकर्म नामकरण निष्क्रमण अन्नप्राशन चौलकर्माणां संस्कारणं कालातिप-
त्तिदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रायश्चित्तहोमं करिष्ये॥ इति संकल्प्य॥ महाव्या-
हृत्यादि प्रायश्चित्तहोमं समाप्य चौलातिरिक्तसंस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं चौला-
करणे अर्धकृच्छ्रं बुद्धिपूर्वं चौलातिरिक्तकरणे प्रत्येकमर्धकृच्छ्रं चौलकरणे कृच्छ्रं बटुना कारयेत्॥

अग्न्यक्षौ तस्य साम्नाय त्वेनगोदानतिलाद्युतिसद्ध्स्वदशासहस्रगायत्रीजपद्वादशब्राह्मणभोज
नादिकं कं प्रायश्चित्तं कारयित्वा अतीतानि जातकर्मादि निकृत्वा पूर्वोक्तप्रकारेणाउपनयनं तत्रस
माचरेत्॥ उपनयनेसह चौलकरणे पूर्वं घुः संस्कारद्वयं संकीर्य युगपत्स्वस्तिवाचनमंडपस्थापन
नांदीश्राद्धानि कृत्वा पूर्वं घुर्मंगलस्नानादि चौलप्रयोगं सर्वं कृत्वा पुनश्च तिथ्यादिकं संकीर्त्य उपन
यनसंकल्पाद्युपनयनं कार्यं॥ ॥इत्युपनयनविधिः॥ अथोपनयनानंतरं पुण्याहवाचायोवे
दारंभनिमित्तं मातृकापूजनपूर्वकमाभ्युदयिकश्राद्धं कृत्वा॥ शुचौ देशे पंचभूसंस्कारान्कृ
त्वा लौकिकाग्निं स्थापयेत्॥ ततः प्राणानायम्य देशकालौ स्मृत्वा अस्य ब्रह्मचारिणो यजुर्वेदा
रंभमहं करिष्ये॥ अथ वैकल्पिकानि॥ एकवेदारंभः॥ पूर्वेण ब्रह्मणोगमनं॥ उत्तरेण पात्रासादनं॥
द्वे पवित्रे। ताम्रमयी आज्यस्थाली। पालाशास्समिधः। प्रोक्षा वाधारो। समिधत्रमे आज्यभागौ। पू
र्णपात्रं। दक्षिणा। एतान्वैकल्पिकपदार्थानहं करिष्ये। अथ देवतानिध्यानं। तत्र प्रजापतिं। इन्द्रं।
अग्निं। सोमं। अंतरिक्षं। वायुं। ब्रह्माणं। छंदांसि। प्रजापतिं। देवान्। ऋषीन्। श्रद्धां। मेधां। सदसस्प
तिं। अनुमतिं। अग्निं। वायुं। सूर्यं। अग्निवरुणौ। अग्निवरुणौ। सवितारं। विष्णुं। विश्वान्देवान्मरुतः

स्वर्कान्। वरुणं। प्रजापतिं। अग्निं स्विष्टकृतं। एता देवता अंगप्रधानार्था आज्येनास्मिन्कर्मण्यहं
यक्ष्ये। ततो ब्रह्मोपवेशनादि आज्यभागांतं कृत्वा॥ ॐ अंतरिक्षाय स्वाहा। इदमंतरिक्षाय न मम॥
ॐ वायवे स्वा· इदं वा· ब्रह्मणे स्वा· इदं ब्र· छंदोभ्यः स्वा· इदं छं· प्रजापतये स्वा· इदं प्र· देवेभ्यः स्वा· इदं दे·
ऋषिभ्यः स्वाहा इदं ऋ· श्रद्धायै स्वा· इदं श्रद्धायै· मेधायै स्वा· इदं मेधायै· सदसस्पतये स्वा· इदं सदसस्पत
ये· अनुमतये स्वा· इदं अनु·। भूर्भुवस्स्वरिति महाव्याहृतीनां प्रजापतिऋषिः क्रमेणगायत्र्युष्णि
गनुष्टुप्छंदांसि। अग्निर्वायुः सूर्यो देवता वेदारंभहोमे वि· ॐ भूः स्वाहा इदम· ॐ भुवः स्वाहा इदं वा·
ॐ स्वः स्वाहा। इदं सू·। त्वंनो अग्न इति मं· वा· त्रि· अग्नीवरुणौ देवता वेदारंभहो· त्वन्नो अग्ने· इद
मग्नीवरुणाभ्यां न· स त्वन्नो अग्न इति वा· त्रि· अग्नीवरुणौ दे· वे· हो· सत्वन्नो अग्ने· इदमग्नीव·
अयाश्चाग्न इति मं· वा· ऋ· रूतीछं· अग्नीवरुणौ दे· वे· हो· अयाश्चाग्ने· इदमग्नये अ·। येते शतमिति मं
वा· त्रि· वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता वे· हो· येते शतं· इदं वरुणाय सवित्रे विष्णवे
विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च· उदुत्तममिति मं· शु· त्रि· वरुणो दे· वे· हो· उदुत्तमं· इदं वरुणाय·
प्रजापतये· इदं प्र· अग्नये स्विष्टकृते· इदमग्नये स्वि·॥ संस्रवप्राशनं। प्रविशान्यां मार्जनं। पवित्रप्र

प्र॰ग॰ल

प्रतिपत्तिः। ब्रह्मन्वेदारंभांगभूतमिदं पूर्णपात्रमहं संप्रददे। प्रणीताविमोकः। यदि ऋग्वेदमध्येष्य
माणः। तदाज्यभागांते। पृथिव्यै स्वाहा। इदं पृ॰ अग्नये स्वाहा। इदम॰ ब्रह्मण इत्यादि स्विष्टकृतं पूर्ववत्।
सामवेदं चेत्तदा। दिवे स्वाहा इदं दिवे॰ सूर्याय स्वाहा इदं सू॰ ब्रह्मण इत्यादि पूर्ववत्। यद्यथर्वणवेदं तर्
दा। दिग्भ्यः स्वाहा इदं दिग्भ्यो॰ चंद्रमसे स्वाहा इदं चंद्रमसे। ब्रह्मण इत्यादि पूर्ववत्। यद्येकदा सर्ववेदारं
भः। तदा प्रतिवेदं वेदाहुतिद्वयं हुत्वा। ब्रह्मणे छंदोभ्यः इत्याहुतिद्वयं होतव्यं। ततः प्रजापतये स्वाहा
इत्याद्याः सप्ताहुतयः स्रुवेण ततो महाव्याहृतिरिति स्विष्टकृदंता दशाहुतयः। ततः संस्रवप्राशनं।
ब्रह्मणे पूर्णपात्रस्य दानं। ततः गणेशं। सरस्वतीं। लक्ष्मीं। हरिं। विद्यां। विद्यादि पूजयेत्॥ ततो वेदारं
भः॥ प्रसन्नमुखोपविष्टाय आचार्यमुखमीक्षमाणाय कूर्म इव प्रह्वीभूतायोपसन्नाय कृतवेता
यानस्कृताय। स्वहस्तौ जानुभ्यामुपरि कृताय ब्रह्मचारिणे वेदं प्रयच्छति। प्रणवं प्राक् प्रयुंजीत व्या
हृतिस्तदनंतरं॥ सावित्री चानुपूर्वेण ततो वेदं समारभेत्। प्रणवं आद्यंते च कुर्यात्। आरंभेवा
वसाने च ब्रह्मचारी गुरुः। पादोपसंग्रहणं कुर्यात्। एवं स्वशाखामधीत्य परशाखां पठेत्। अस्कंदयं
स्तथा रेतो वासुदेवपरायणः॥ मुंडो वा जटिलो वा स्यादथवा स्याच्छिखाजटिः॥ एवं च सति यदि का

मतो रेतः स्कंदति तदा शुध्यर्थं नैऋतं गर्दभयागं आज्याहुतिर्वा कुर्यात्। स्वप्ने चेत्कामतो रेतः स्कं
देत्तदा स्नात्वा सूर्यं पूजयित्वा पुनर्मन इति त्रिर्जपेत्। यदि गुरोः कार्यवशाद्दैववशाद्वा सप्तरात्रं भि
क्षालोपो भवति अग्निपर्यायालुप्तात्तदा अवकीर्णव्रतं चरेत्। उपवीतादिनाम्योतिरित्यादिकृपा
जुहुयात्। संध्याग्निकार्यलोपे स्नात्वा गायत्र्यष्टसहस्रं जपेत्। स्वस्थो यदि भिक्षां न कुर्यात्तदा गा
यत्र्यष्टशतं जपेत्। मधुमांसभक्षणे कृच्छ्रमेकं चरेत्। दंडोपवीताजिनमेखलानां लोपो आज्येन
व्याहृतिहोमं कुर्यात्। ततः प्राणानायम्य विधिवद्धारयेत्॥ इति वेदारंभः॥ अथ गोदानप्रयोगः
॥जन्मतः सप्तदशे वर्षे नोचेत् कृतविसर्गाः सर्वकालवर्षपक्षे त्वा उदगयने शुक्लपक्षे चोलोक्त
तिथ्यादौ गोदानं कार्यं। तत्र पूर्वेद्युराचार्यः कृतनित्यक्रियः बटुं दक्षिणत उपविश्य प्राणानायम्य
देशकालौ स्मृत्वास्य ब्रह्मचारिणः केशांतमहं करिष्ये। तदंगत्वा मंडपस्थापनं मातृकापूजनं
वसोर्द्धाराकारणं नांदीश्राद्धं च करिष्ये इति प्रत्येकं संकल्प्य तानि क्रमेण कृत्वा। परेद्युः कृतनित्य
क्रियः बटुं दक्षिणत उपवेश्य समुद्भूतैरुपलेपनाद्यग्निस्थापनांतं कृत्वा पुनर्देशकालौ स्मृत्वा
अस्य केशांतमहं करिष्ये। तत्र पूर्वेण ब्रह्मणो गमनं। उत्तरेण पात्रासादनं। द्वे पवित्रे। ताम्रभर

प्र॰ग॰ल

यीआज्यस्थाली।पालाशसमिधः।प्रांचावाघारौ।समिद्धूतमे आज्यभागौ।पूर्णपात्रं दक्षिणा॥
त्रिरात्रं ब्रह्मचर्यं।घृतपिंडः।सकेशगोमयपिंडस्य गोष्ठे निधानं।एतान्येव कल्पिकान्यदर्थान
हं कदिष्ये॥अथ देवतानिधानं।तत्र प्रजापतिं।इन्द्रं।अग्निं।सोमं।वायुं।सूर्यं।अग्निवरुणौ।अग्नि
वरुणौ।अग्निं।वरुणं।सवितारं।विष्णुं। विश्वान्देवान्मरुतः स्वर्कान्।वरुणं।प्रजापतिं।अग्निं
स्विष्टकृतं।आज्येनान्यस्मिन्कर्मण्ययहु यक्ष्ये॥ततोऽग्रस्तात्प्रवेशनाद्याज्यभागांतं।विशेषः।नात्रच
रुः।आसादनानंतरं उपकल्पनीयानि।शीतोदकं।घृतपिंडं।त्रेणी शललि।सप्तविंशति तरुणा
निकुशाः।ताम्रयीमे परिस्कृत आयसः क्षुरः।आनडुहे गोमयपिंडं।नापितश्च।अत्र गोरेव चरः।
एतान्युपकल्प्य।पवित्रे कृत्वा।प्रोक्षणीः संस्कारादिपर्युक्षणांतं कृत्वा।प्रजापतये स्वाहा इदं प्र॰
इन्द्राय स्वाहा इदमिं॰ अग्नये॰ इदम॰ सोमाय॰ इदं सो॰।ततो व्याहृत्या होमं।स्विष्टकृतं जुहुयात्॥
ततः संस्रवप्राशनं।पवित्राभ्यां॰ पवित्रप्र॰ पूर्णपात्रदानं।ब्रह्मणो केशांतहोमांगतया विदितं
मिदं पूर्णपात्रं तु॰ प्रणीतावि॰।ततः शीतास्वष्णास्वाप।आसिंचति।उष्णेन वायउदकेन रोषत्रेम ३५
श्रुवपतिविशेषः॥नात्र चरुः॥आसादनानंतरं उपकल्पनीयानि।शीतोदकं।उष्णोदकं।घृतपिंडं।त्रे
ना

ण्याशललि।सप्तविंशतितरुणानिकुशाः।ताम्रपरिस्कृत आयस क्षुरः।आनडुहे गोमयपिंडं।ना
पितश्च।अत्र गोरेव वरः।एतान्युपकल्प्य।पवित्रे कृत्वा प्रोक्षणीसंस्कारादि पर्युक्षणांतं कृत्वा।प्रजा
पतये॰ इदं प्र॰ इन्द्रा॰ इदमिं॰ अग्नये॰ इदम॰ सोमाय॰ इदं सो॰ ततो महाव्याहृत्यादि स्विष्टकृतं जुहु
यात्॥ततः संस्रवप्राशनं।पवित्राभ्यां॰ पवित्रप्र॰ पूर्णपात्रदानं।प्रणिता॰।ततः शीतास्वष्णास्वाप आ
सिंचति।उष्णेन वा।अदितिकेशान्श्मश्रु विशेषः।त्रिः क्षुरेणाशिरः प्रदक्षिणं समुखं परिहरणं॥य
त्क्षुरेणशिरोमुख मास्या युः प्रमोषीः अन्यत्सर्वं रुप्यादिकं चूडाकरणवत्।ततः आचार्याय गां द
द्यात्॥त्रिरात्रं ब्रह्मचर्यं॥ ॥इति केशांतप्रयोगः॥अथ ब्रह्मचारीव्रतलोपे प्रायश्चित्तं।तत्र बौधा
यनः॥अत्रशौचाचमनसंध्यावंदनं दर्शनभिक्षाग्निकार्यरहितस्य शूद्रादिस्पर्शी कोपीन कृष्ण सूत्र
यज्ञोपवीतमेखलाहंडाजिनत्यागादिवास्यापल त्रधारणपादुकाध्यारोहणमाल्यमालाधारणो दू
र्तनानुलेपनाजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरतिपाखंडादिसंभाषणपर्युषितभोजनादि ब्र
ह्मचारी व्रतलोपे सकलदोषपरिहारार्थं ब्रह्मचारी कृच्छ्रत्रयं चरेन्महाव्याहृति होमं कुर्यात्॥तद्य
था॥लौकिकाग्निं प्रतिष्ठाप्य।ब्रह्मचारिणाघाज्यभागांतं कृत्वा।प्रथमं व्यस्तसमस्ताभिर्व्याहृतिभि

प्र॰ग॰र॰

चतस्र आहुतिर्हुत्वा। ॐ भूरग्नये पृथिव्यै च महते च स्वाहा। ॐ भुवो वायवेऽन्तरिक्षाय च मह
ते च स्वाहा। ॐ सुवरादित्याय च दिवे च महते च स्वाहा। ॐ भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च
महते च स्वाहा। ॐ पाहि नो अग्न एनसे स्वाहा। ॐ पाहि नो अग्ने विश्ववेदसे स्वाहा। ॐ यज्ञं पाहि
विभावसो स्वाहा। ॐ सर्वं पाहि शतक्रतो स्वाहा। ॐ पुनरूर्जा नि॰ हस स्वाहा। ॐ सह रय्या॰ स्यरि॰
स्वाहा। ११ पुनर्व्याहृतिभिर्हुत्वा स्विष्टकृदादि होमः। शेषं समापयेदिति। एतद्व्रतधर्मलोपप्रा॰
यश्चित्तं। बहुधर्मलोपे तु प्रायश्चित्ते विशेषः कृच्छ्रविधाने शौनकेनोक्तः। तं बोधयीजपेन्मंत्रं उक्षं॰
चित्रेशिवालये॥ ब्रह्मचारिस्वधर्मे च न्यूनं चेत्पूर्णमेव हि इति। महानाम्न्यादिव्रतेषु लुप्तेषु नारत
म्येन त्रीन् षट् द्वादश वा कृच्छ्रान् कृत्वा पुनर्व्रतं प्रारंभेदिति स्मृत्यर्थसारे॥ ॥इति प्रयोगरत्ने ब्र॰
ह्मचारिव्रतलोपे प्रायश्चित्तं॥ ॥पुनःसंस्कारे विशेषमाह॥ अजीनमेखलादंडो भैक्षचर्यानिव्र
तानि च॥ निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणीति॥ बृहद्विष्णुरप्याह॥ वपनं मेखलादंडो भै
क्षचर्यव्रतानि च॥ निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणि॥ निमित्तिकं पुनरुपनयनं याज्ञ
वल्क्येनोक्तं। अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव च॥ पुनःसंस्कारमर्हंति त्रयो वर्णा द्विजा

जायते। पुनःसंस्कारस्योपनयनं। तच्चाश्वलायनाद्युक्तप्रकारेण कर्तव्यं। यथोक्तं॥ अथो
पेतपूर्वस्य कृतं केशवपनं। मेधाजननं चातिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमह इति॰
सावित्रीमिति॥ ॥अथ समावर्तनं॥ तत्र वेदं च ब्राह्मणात्मकं समाप्य सम्यक् पाठतः। अ
र्थतश्च स्नायात्। अथ ब्रह्मचर्यव्रतं अष्टाचत्वारिंशकं। द्वादशवर्षं वा समाप्येति व्रतेवारितेस्नाया
दिति पक्षः॥ तर्कोऽर्थवाद इति कर्कोपाध्यायः॥ तर्के मीमांसेति कल्पतरुकारः। यद्वा षडंगसहितं
वेदमधीत्य स्नायात्। मंत्रे वा ब्राह्मणे वाधीते स्नायात्। प्रश्नेग्रंथमात्रमधीत्य यज्ञविद्यां चाधीस॰
स्नायात्। मंत्रब्राह्मणात्मकं वेदं अधीत्य वा ब्रह्मचारी गुरुं अथ दानेन संपूज्य तेनानुज्ञातो॰
जातिविदुक्ते शुभकाले आचार्यगृहे समावर्तनं नाम कर्म कुर्यात्। ब्रह्मचारी कृतनित्यक्रियः कृ
प्रातरग्निकार्यश्च। तत आचार्यः प्राणानायम्य देशकालौ संकीर्त्य अस्य ब्रह्मचारिणः गृहस्थाश्रा॰
श्रमांतरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनाख्यं कर्म करिष्ये। इति संकल्प्य तदंगत्
तं निर्विघ्नार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं चाहं करिष्ये॥
श्राद्धादि समाप्य॥ ततः आचार्य अहं स्नास्य इत्युक्ते स्नाहीति प्रत्युज्ञा गुरोः। ततः पादोपसंग्रहणं

प्र·ग·त्न

गुरुः ततः परिश्रितेपंचभूसंस्कारान्कृत्वा। लौकिकाग्निस्थापनं॥ अथवैकल्पिकावधारणं॥
तत्रपूर्वेयाब्रह्मणोगमनं। उत्तपपात्रासादनं। द्वेपवित्रे। ताम्रमयीआज्यस्थाली। पालाशसमि
धः। प्रांचावाघारौसमिधहमेआज्यभागौ। पूर्णपात्रं। दक्षिणा। वेदाध्ययनानंतरं समावर्तनां
दधिप्राशनं। अमोत्रधौतवस्त्रं। एतान्वैकल्पिकान्पदार्थानदूकरिष्ये॥ अथदेवतानिध्यानं॥ त
त्रप्रजापतिं। इन्द्रं। अग्निं। सोमं। अथप्रधानदेवता। अंतरिक्षं। वायुं। ब्रह्माणं। छंदांसि। प्रजाप
तिं। देवान्। ऋषीन्। श्रद्धां। मेधां। सदसस्पतिं। अनुमतिं। इतियजुर्वेदपठनानंतरंसमावर्तनेय
द्यवेदद्वयंपठित्वावेदत्रयंपठित्वावेदचतुष्टयंपठित्वासमावर्तनेनद्यातदेवतानिध्यानंतत्रदेद
देवतांहोमवेद्यारंनंकुर्यात्। अग्निं। वायुं। सूर्यं। अग्निवरुणावग्निवरुणौ। सवितारं। विष्णुं। वि
श्वान्देवान्मरुतःस्वर्कान्। वरुणं। प्रजापतिं। अग्निंस्विष्टकृतं। एतानाज्येन अस्मिन्कर्मण्यद्
यक्ष्ये। ततःब्रह्मवर्णाधाज्यभागांतेविशेषः॥ पात्रासादनेउपकल्पनीयेषुसमिंधनकाष्ठानि॥
समिधः पयुक्षणार्थंउदकंदरितान्कुशान्अष्टौवारिकुंभान्। औदुंबरेयद्वादशांगुलंदंतका ३८
ष्ठं। दधि। नापितं। स्नानवारि। उद्वर्तनद्रव्यं। चंदनं। अहतेवाससी। यज्ञोपवीते। पुष्पाणि। उष्णीषं।

कर्णालंकारौ। अंजनं। दर्पणं। स्रतनं। स्रतनछत्रं। उपानहौ। वेणवंदंडं। पूर्णपात्रंचेति॥ ततःप
वित्रकरणादिपर्युक्षणांतंकुर्यात्। प्रजापतयेस्वाहा। इदंप्र· इन्द्राय· इदमिं· अग्नये· इदम· सोमा
य· इदंसो· अंतरिक्षाय· इदमं· वायवे· वायवे· ब्रह्मणे· ब्रह्मणे· छंदोभ्य· इदंछं· प्रजाप· इदंप्र· देवे
भ्य· इदंदे· ऋषिभ्यः· इदंऋ· श्रद्धायै· इदंश्र· मेधायै· इदंमे· सदसस्पतये· इदंसदसस्पतये· अनु
मते· इदंअ·। यदिऋग्वेदमधीत्यस्नानंकरोतितदा॥ पृथिव्यै· इदंपृ· अग्नये· इदम· इत्याहुति
द्वयंहुत्वाब्रह्मणेछंदोभ्यइत्यारभ्यानुमत्यंतानवाहुतीर्जुहोति। एवंसामवेदिसूर्यायेत्याहुतिद्व
यंहुत्वाब्रह्मणइत्यादिनवाहुतिर्जुहोति। यदिवेदचतुष्टयमधीत्यस्नानंकरोति। तदाआज्यभा
गांतरंप्रतिवेदाहुतियद्धुत्वाब्रह्मणेछंदोभ्यइतियाहुतिंपुनःपुनर्जुहोतिततःप्रजापत्यपीत्या
रभ्यानुमत्यंताःसप्ताहु तिस्तंत्रेणजुहोति। एवंवेदद्वयत्रयाध्ययनेपियोज्यं। भूर्भुवस्वरिति
महाव्याहृतीनांप्र· गायत्र्युष्णिगनुष्टुप्छंदांसि। अग्निर्वायुःसूर्योदेवता। स· होमेवि·॥ ॐ
भूःस्वाहा। इदम· भुवःस्वाहा। इदंवा· स्वःस्वा· इदंसू· त्वन्नोअग्नइतिवा· त्रि· वरुणा· होमे· त्वन्नो
अग्ने· इदमग्नीव· सत्वन्नोअग्नइतिवा· त्रि· वरुणा· होमे· सत्वन्नोअग्ने· इदमग्नीव· अया

ऋ॰ग॰ल

आग्नइतिवा॰ बृहती॰ अग्निर्दे॰ होमेवि॰ अयाश्चाग्ने॰ इदम॰ येतेशतमितिवाम॰ त्रि॰ वरुणः सविताविष्णु
र्विश्वेदेवामरुतस्स्वर्कादेवता होमेवि॰ येतेशतं॰ इदं वरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः
स्वर्केभ्यश्चन॰ उदुत्तममितिशुनःशेप॰ त्रि॰ वरुणो॰ होमेवि॰ उदुत्तमं॰ इदं वरुणा॰ प्रजापतये॰ इदंप्र॰
अग्नयेस्विष्टकृते॰ इदमग्नयेस्वि॰ संस्रवप्राशनं। पवित्राभ्यांमार्जनं। पवित्रप्रतिपत्तिः। ब्रह्मन्पूर्
र्णपात्रंतुभ्यमहंसंप्रददेनमम। प्रणीताविमोकः। ततब्रह्मचारीउपसंग्रहणपूर्वकंगुरुनमस्
कृत्यपरिसमूहनादिव्याप्युपकरणांतंसमिधाधानंतस्मिन्नेवाग्नौकुर्यात्। ततः आचार्यगुरु
षैः परिश्रितस्योत्तरभागस्थापितानांदक्षिणोत्तरतानिजलपूर्णकलशानांपूर्वभागेआस्तृते
षुकुशेषुउदङ्मुखस्तिष्ठन्। येअप्स्वंतरितिप्रजापतिरृषिः यजुश्छं॰ आपोदेवताउदककुम्भग्रहणेवि॰
येअप्स्वंतरग्नयःप्रविष्टागोह्यउपगोह्योमयूखोमनोहास्खलोविरुजस्तनूदूषुरिंद्रियहातान्वि
जहामियोरोचनस्तमिहगृह्णामीत्यनेनमंत्रेण प्रथमकलशाद्दक्षिणचुलुकेनजलमादाय
तेनोदकेनस्वकीयंशिरोनिषिंचति। तेनमामितिमंत्रस्यप्रजाप॰ यजु॰ आपोदे॰ अभिषेचनेवि॰ ३८
तेनमामभिषिंचामिश्रियेयशसेब्रह्मणेब्रह्मवर्चसायेतिमंत्रेणजलग्रहणंतुअपरेभ्योपिस्मे

भ्योयेअप्स्वंतरग्नयइत्यनेनैवमंत्रेण अभिषेचनमंत्रास्तुपृथक्पृथक्॥ पुनर्येअप्स्वंतरग्नयइत्यनेनमं
त्रेणोदकमादायद्वितीयादुदकुंभात्। येनश्रियमितिप्रजाप॰ यजु॰ आपोदेवताअभिषेचनेवि॰
येनश्रियमकृणुतांयेनावमृशतांसुरां॥ येनाक्षावभ्यषिंचतांयद्वांतदश्विनायशइत्यनेनमं
त्रेण। द्वितीयोकुंभजलेनाभिषिंच्य। पुनर्येअप्स्वंतरग्नयइत्यनेनोदकमादायतृतीयकुंभात्। आ
पोहिष्ठेतितिसृणांसिंधुद्वीपऋषिः गायत्रीछंदः आपोदेवताअभिषेचनेवि॰। आपोहिष्ठा॥
वक्षसेइत्यनेनमंत्रेणाभिषिंच्य। पुनर्येअप्स्वंतरग्नयइत्यनेनोदकमादायचतुर्थकुंभात्। योवःशिव
तमोरसइत्याद्युशतीरिवमातरइत्यंतेनाभिषेकः। पुनर्येअप्स्वंतरग्नयइत्यनेनोदकमादायपंच
मकुंभात्। तस्माअरंग॰ यथाचनइत्यभ्यभिषेकः। ततोयेअप्स्वंतरग्नयइत्यनेनमंत्रेणषष्ठसप्तमा
ष्टमकुंभेभ्यः प्रत्येकमुदकमादायतूष्णींवारत्रयंअभिषिंचति। उदुत्तममि॰ शु॰ त्रि॰ व॰ मेखलामोच
नेवि॰। उदुत्तमं॰ स्यादेतिमंत्रेणमेखलांशिरोमार्गेणनिःसार्यमेखलांभूमौनिधाय। कृष्णाजि
नंचोत्तरीयंदंडंइत्यादिसर्वंचरुत्वावासोन्यत्परिधायादित्यमुपतिष्ठेत्। उद्यन्भ्राजभृष्णुरितिमं
त्रस्यप्रजा॰ अतिशक्करी॰ आदित्योदे॰ आदित्योपस्थानेवि॰। उद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिः

प्र·ग·ले

रस्त्वा स्थात यावन्निरस्त्वाद्दशसनिरसि दशसनीं माकुर्या विदन्मागमयो घन्या जनन्तसुरिं द्रोम
रुद्रिरस्त्वा द्दिवायावन्निरस्त्वा ङ्गतसनिरसि शतसनिम्माकुर्या विदन्मागमयो घन्या जनन्तसु
रिं द्रोमरुद्रिरस्त्वा स्थायं यावन्निरस्त्वा सहस्त्रसनिरसि सहस्त्रसनिम्माकुर्या विदन्मागमयेः
इत्यनेन मंत्रेणा द्दित्यमुपस्थाय॥ ततो दधिप्राशनं। जटालोमनखानि कृंतनं। स्नानं। औदुंबर
काष्ठेन दंतधावनं। अन्नाद्याये तिमंत्रस्याथर्वण ऋषिः अनुष्टुप्· सोमो देवता दंतधावने वि·॥
अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्॥ समेमुखं प्रमार्क्ष्यते यशसा च भगेन चेत्यनेन मं
त्रेणानंतसुगंधीनाद्रव्येणो द्वर्तनं। स्नानं। चंदनाद्यनुलेपनं गंध ह्रीत्वा मुखनासिकयोरालंभनं॥
प्राणापानावितिमंत्रस्य प्र· यजु· प्राणापानौ देवता चंदनोपग्रहणे वि·। प्राणापानौ मे तर्पय चक्षु
र्मे तर्पय श्रोत्रं मे तर्पय इत्यनेन मंत्रेण पाण्योरवनेजनं कृत्वा तदुदकमाद्याया पसव्यं कृत्वा
दक्षिणाभिमुखो भूत्वा तदुदकं दक्षिणस्यां दिशि निषिंचति। पितरः शुंधध्वं प्रजा· यजु· अश्वीसर
स्वती देवता पाण्यवनेजने दक्षिणस्यां दिशि विशेकने वि· पितरः शुंधध्वमितिमंत्रेण। ततो यज्ञो
पवीती भूत्वा उदकोपस्पर्शनं। ततश्चंदनादिना स्नानमनुलिप्य जपेत्। सुचक्षा अहं प्र· य· आशीर्दे

भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां १

वता जपे वि·। सुचक्षा अहमक्षीभ्यां भूयासमिति समुं मंत्रं। अहं वासः परिधानं। अरजकधौतस्या
वा। परिधास्येतिमंत्रस्यालंबायन ऋ· पंक्तिछं· वासो देवता वस्त्रपरिधाने वि·। परिधास्ये यशो धास्ये
दीर्घायुत्वाय जरदष्टिरस्मि॥ शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्य इत्यनेन मंत्रेण॥ पि ३
यज्ञोपवीतद्वयं धारणं पूर्ववत्। अथोत्तरीयं परिधत्ते। यशसामेति अथर्वण ऋषिः पंक्तिछं· लिंगोक्ता·
उत्तरीयवस्त्रपरिधाने वि·। यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती॥ यशो भगश्च माविदद्यशो मा
प्रतिपद्यतामित्यनेन मंत्रेणाच्छादयीत। एकं चेद्वासो भवति तदा तस्मैव वस्त्रपरिधानाय वाससउत्त
रार्धमुत्तरीयं कुर्यात्। यशसा मा द्यावापृथिवी इत्यनेन मंत्रेण। या आहरज्जमदग्निरितिमंत्रस्य
भरद्वाज· अनुष्टुप्· सुमनसो देव· पुष्पग्रहणे वि·। या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय॥
ता अहं प्रतिगृह्णामि यशसा च भगेन चेत्यनेन मंत्रेण पुष्पमालाग्रहणं। ततः शिरसि बंधनं॥ यद्य
शोप्सरस इति मंत्रस्य भरद्वाज ऋ· अनुष्टुप्· सुमनसो दे· पुष्पबंधने वि·। यद्यशो प्सरसामिन्द्रश्च
कार विपुलं पृथु॥ तेन संग्रथिताः सुमनस आबध्नामि यशो मयीत्यनेन मंत्रेण। उष्णीषेण शिरो वे
ष्टयते॥ सुवासा सुवासा इतिमं· विश्वामि स्त्र्यो· उष्णीषेण शिरोवेष्टने वि·। युवा सुवासाः परिवीत आ
त्रि·

प्र·ग·त्त

गात्सउश्रेयान्भवतिजायमानः॥ तंधीरासः कवयउन्नयंतिस्वाध्योमनसादेवयंतइत्यनेनमंत्रे
णा। दक्षिणकर्णेकुंडलेकरोतिसौवर्णो अलंकरणमितिन· उष्णिक्छं· अलंकरणदे· अलंकर
णधारणेवि·। अलंकरणमसिभूयोलंकरणंभूयादितिमंत्रेणवामकर्णे। अनेनैवमंत्रेण·
वृत्रस्येतिमंत्रेणप्रजापतिऋ· गायत्री· अंजनंदेव· चक्षुरंजनेवि·। वृत्रस्यासिकनीक· देहीः
त्यनेनमंत्रेणाक्षिणीअंक्ते प्रथमंदक्षिणं॥ ततोवामीरोचिष्णुरसीत्यनेनमंत्रेणात्मानमादर्शे
प्रेक्षते। छत्रंप्रतिगृह्णाति। बृहस्पतेतिगोत· बृहद्गायत्रीछंदः छत्रंदेवता छत्रप्रतिग्रहणेवि
बृहस्पतेश्छदिरसि पाप्मनोमामंतर्धेहि तेजसोयशसोमामंतर्धेहीत्यनेन·। प्रतिष्ठेस्थइति
मंत्रस्यप्रजापतिऋ· यजुश्छंदः लिंगोक्ता उपानहौपरिधानेवि·। प्रतिष्ठेस्थोविश्वतोमापातंइ
त्यनेनमंत्रेणोपानहौप्रतिमुंचते पादयोर्युगपत्। विश्वाभ्यइतिमंत्रस्य याज्ञवल्क्यऋ· त्रि· इं
द्रोदे· दंडग्रहणेवि·। विश्वाभ्योमानाष्ट्राभ्यस्परिपाहि सर्वतइत्यनेनमंत्रेणवेणवंदंडमादत्ते॥
अभिषेकादिदंडांतानांतस्नानकर्त्ताकरोतिनाचार्यः। दंतप्रक्षालनादीनिनिःसमपिमंत्रवंति दं ६·
वासश्छत्रोपानहश्चनवानामुपादानेमंत्रोभवंति॥ ततः आचार्यः स्नातकस्यनियमान्श्रावयेत्॥

तद्यथा॥ नृत्यगीतवादित्राणि स्वयंनकुर्यात्। अन्यैर्गीतादिक्रियमाणेनगच्छेत्। दृष्टुश्रोतुवा।
इच्छया। अपरैः क्रीयमाणगीतंप्रतिगच्छेत्। स्वयंचनकुर्यात्। क्षेमेसतिरात्रौग्रामांतरंनगच्छेत्।
अक्षयेतुकामंगच्छेत्। नचक्षेमेसतिधावयेत्। उदपानावेक्षणवृक्षारोहणफलप्रपतनसंधि
सर्पणाविवृतस्नानंविषमलंघनशुष्कवदनंसंध्यादित्यप्रेक्षणभैक्षणानिनकुर्यात्॥ वर्षसमाप्त
तो व्रजेदयंमेवज्रः पाप्मानमपहनदित्यनेनमंत्रेण। अप्स्वात्मानंनावेक्षेत। अजातलोम्नीं विपुंसीं
षंढंचनोपहसेत्। नगच्छेत्तौ[illegible] प्रतिगर्भिणीं विजन्येतिब्रूयात्। सकुलमितिनकुलं। नगाल
मितिकपालंवदेत्। मणिधनुरितीन्द्रधनुः। गांधयंतींपरस्मैनाचक्षीत। उर्वरायामनंतर्हिता
यांभूमावुत्सर्गं तिष्ठन्मूत्रपुरीषेननकुर्यात्। स्वयंप्रशीर्णेन। काष्ठेनगुदं प्रमृजीत। विकृतं
वध·८ वासोनाच्छादयीत। दृढव्रतोवधत्रस्यात्सर्वतआत्मानंगोपायेत्। सर्वेषांमित्रमिव। स्नातकस्य
ततोअग्निहोत्रव्रतंचर्यांच्यते॥ तद्यथा॥ अमांसाशीभवति। अमृन्मयेपात्रेणपिबति। स्त्रीर
जस्वलाकाकशूनांदर्शनंकुर्यात्। संभाषणंस्पर्शादिसम्बन्धंनकुर्यात्। शवशूद्रसूतकान्नानि
चनाद्यात्। सूतकानांनाद्यात्। मूत्रपुरीषष्ठीवनंचातपेनैकुर्यात्। अवेजास्वदीपादिनाराश्रौनो

प्र॰ग॰ल

अनेन कर्तव्यं। सत्यं वदनमेव कर्तव्यं। नाधस्तमाऽअमा॰ सीत्याद्योयमनियमाः कर्तव्याः। यदि प्र
वर्ष्यवान्स्नी शिनो नवृत्तिं तदा मूत्रपुरीषे ष्ठीवातपेन कुर्यात्। उत्सेवमादिति कुर्यात्॥ ॥इति प्रयो
गरत्ने समावर्तनप्रयोगः॥ ॥अथ क्रमप्राप्तविवाहः॥ तत्रैतावदुपयोगी नयाकिंचित्संक्षेपेन
विनतिष्ठन् प्रायश्चित्तीयते हि स इति दक्षस्मृतेः॥ गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया वेदव्रतानि
वापरं नीत्वा पुनर्यमेव वा। अविलुप्तब्रह्मचर्यो लक्षिण्यां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कांता
मसपिंडां यवीयसीं अरोगिणीं भ्रातृमतीं समानार्षगोत्रजामिति याज्ञवल्क्योक्तेः। त्रिविधापि वेद
व्रतोभयस्नातकोऽविलंबेन लक्षणादिविशिष्टां स्त्रियं नपुंसकव्यावृत्तये स्त्रीत्वेन परीक्षितां
मुद्वहेत्। तत्रापि कुलमग्रे परीक्षितेति गृह्यवचनात् दोषे सदाचारादिगुणवत्त्याहीनक्रियेत्या
दिदोषहीनतया च परीक्ष्यं कुलं तज्ज्ञोद्वाह्या। तदनु लक्षणाद्यपि परीक्ष्यं। लक्षणानि च शुभाशुभ
सूचकानि लोमनखकेशदशनत्वादीति प्रत्यक्षगम्यानि बाह्यानि अंतराणि चाष्टौ पिंडान् कृ
त्वा दिनाग्रथोक्तानि द्विविधान्यपि महाग्रंथेभ्यो ज्ञेयानि विस्तरभियात्विह नोच्यंते॥ उपाद
नोनपर्जागेन वा पुरुषांतरपूर्विकानन्यपूर्विकांतं अनेन वाग्दानमनोदत्तान्विः

परिगताः स समयं दत्तं नीता भुक्ता गृहीतं गर्भप्रसूता चेति सप्त पुनर्भवो याः वर्जनते। कांतावी
दं मनोनयनयो रुल्हाद कारीं॥ समानएकपिंडः पिंडश्चानक्रियामूलपुरुषैः शरीरं वा यस्यानविघ
ते सापिंडांतं॥ कथंचिदेकपिंडक्रियानुप्रवेशेन निर्वाप्यसापिंड्यं केचिदाहुः॥ एकशरीरावय
वाचयेनावयवसापिंड्यं विश्वरूपाद्योनिर्दोषमेनिरे। अत्र बहुतरं वक्तव्यं विचारस्थल
तान्यंगभीत्यानोच्यते। नन्वेवं विधात्शरीरावयवान्वयेन सापिंड्यां विप्रसंगेन काप्यसपिं
ड्ये स तमाह॥ याज्ञवल्क्यः॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति॥ मातृपक्षात्पंचमा
त्पितृपक्षात्सप्तमादूर्ध्वं सापिंड्यं निवर्तत इति विशेषः। कूटस्थमातरम्यात्र गणना॥ तदुक्तं॥ व
ध्वावरस्य वा तातः कूटस्था यदि सप्तमः॥ पंचमी चेत्तयोर्माता तत्सापिंड्यं निवर्तत इति॥ कूटस्थो
मूलपुरुषः यत्संतानने तः एवं च मातृपितृद्वारोक सपिंड्यं विततीनां कन्यकानां मियं संख्यास
कलना॥ उद्वाह्यः पितरौ पितुश्च पितरौ तत जन्मकृद्रं पत्नीद्वंद्वं तस्य चतुष्क्रमष्टकमतो प्यस्य क्रमात्
षोडश॥ वंशारंभकदंपति प्रमिति रिस्यात्सप्तवध्यं रेखा एके कान्वयकन्यकाः पितृकुले
त्रासप्तकुक्ष्य ब्रुवे॥ ॥ अघप्येकस्य वा वह्यो सुतां स्युः स्तदपीह तु॥ संबंध साम्यादेके कगणि

प्र॰ग॰ल

नेत्यवधीयतां॥ २॥ एकस्मिन्मिथुनात्सुतोथ दुहिताद्वंद्वं इयत इयात स्माद्द्वेचतुष्कमष्टकं ततो
मतद्गोत्रघ्नीनोरद्राः॥ यावत्स्तस्यमकष्यमग्निरूतवः कन्याद्देकान्येयेताद्दशेगुणितासेरेः करवद्
त्रीवंशेः सपिंडां पितुः॥ ३॥ मातुर्जन्मरदंपती च मिथुनद्वंद्वं तयोः सागरास्तस्यापंचमकष्यमश्वमि
तिरिसेकाचयः पुंसुते॥ द्वंद्वाद्विद्वियुगततोध्वयंयुतोष्टपंचकध्यं शरष्योण्यः सत्सगुणाः शराश्च
विधवो मातुः सपिंडाः कुले॥ ४॥ कुलद्वयस्य कं कन्याकुयुतामिथः सपिंडकाः॥ हिमांशुदृग्धराद्दशे
विवाहकर्मे वर्जिताइति॥ ५॥ मवियत्सींस्वा पक्षे या वर्षसा षपुषावन्युना अरोगिणी अचिकित्स्य
राजयक्ष्मादिरोगरहिता॥ मातृमतीमितिपुत्रिकाकरणशंकाति इत्यर्थः। पत्रितुपुत्रिकाकरणा
भावनिश्चयस्ताभ्रातृकाप्युद्वहेत॥ असमानार्षगोत्रजां। ऋषेरिमार्षगोत्रवर्लकं स्यमनेप्य
विवर्लकः॥ प्रवरइत्यर्थः॥ गोत्रवंशपरंपराप्रसिद्धं॥ स्वसमाने आर्षगोत्रेयस्यतजयानभवति।तां
यस्कवालधलमौनकानांमिन्नेगोत्राणामपि भर्गबवेनहव्यसावेवसेतिप्रवरैक्यमस्तितत्रविवा
रहरितानां होमानस्दिसमानार्षजामीस्फक्तं आंगिरसांबरीषयौवनाश्वेति मांधातांबरीषयौवनाश्वेति ४२
आंगिरसमांधातृप्रवरभेदेपियौवनाश्वेतिगोत्रैक्यं।तादृशविवाहनिवारणायासमानामित्युक्तं॥

तथा च॥ गोत्रप्रवरोपथकपर्युदासेनिमित्तभ्योप्रवरैक्यविशेषमाह॥ बौधायनः॥ पंचानांत्रि
षुसामान्यादविवाहस्त्रिषुद्वयोः॥ भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपिवारयेदिति गोत्रप्रवरनिर्णा
यः। सपिंडसगोत्रसप्रवरविवाहप्रायश्चित्तादिमहाग्रंथतोवसेयंविस्तरभियेहनोच्यते॥ सा
पत्नमातामहकुलेव्यातिदेशिकासापिंड्यदविवाहः॥ तथा च मनुः॥ पितृपत्न्यः सर्वामातरस्तद्भ्रा
तरोमातुलस्तद्भगिन्योमातृष्वसारस्तदुहितरश्च भगिन्यस्तदपत्यापिभागिनेयान्यथासंक
रकारिण्यास्युरिति। अत्रयाद्वचनवाचनीकमितिन्यायेनपरिगणितेष्वेवातिदेशिकंसपिंड्यं।
ननु पंचमसप्तमपर्यंतं। कश्चित्तुवदनादेवविवाहनिषेधः॥ यथा आश्वलायनगृह्यपरिशिष्टे॥
अथविवाहस्वरूपकन्यमप्यविरुधसंबंधामुपयच्छेतेसूक्तंतेदंपत्योमिथः॥ पितृमातृसाम्ये
वतिरुद्धसंबंधोयथाभार्यास्वसुर्दुहितापितृव्यपत्नीस्वसा चेतिस्वयमेवविरुद्धसंबंधेविद्दते॥
तथा च नारदः॥ प्रसुद्वाहोनेवका / यें। नैकस्मिदुहिताद्वयंनैवेकजन्ययोपुंसोरेकजन्यचकन्य
के॥ नैवंकदाचिदुद्वाहोनैकदामुंडनद्वयं॥ अन्यत्रापि॥ एकजन्ये तु कन्येद्वे पुत्रयोर्नैकजन्मनोः॥
नपुत्री द्वयमेकस्मिन्प्रदद्यात्तु कदाचनेति॥ अथ वरगुणाः॥ तत्र बुद्धिमते कन्याप्रयच्छेदिति आ

प्र-ग-ल

श्वलायनगृह्ये यमः॥ कुलं च शीलं च वयश्च रूपं विद्या च वित्तं च सनाथतां च॥ एतान्गुणान्सप्त प
रीक्ष्य देया कन्या बुधैः शेषमचिंतनीयं॥ ३॥ अन्योपि गुणदोषविचारो ग्रंथांतरादवसेयः॥ अन्यच्च
च॥ कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनं॥ पुत्रोद्वाहान्नैव पुत्रीविवाहोपि ऋतुत्रये॥ अब्दांत
रान्मुंडनं च नैकदा मुंडनद्वयं॥ अब्दे नैवेदपि न दोष इति संहितासारावल्यां॥ फाल्गुणे चैत्रमासे तु परो
द्वाहोपनायते॥ भेदात्तदब्दस्य कुर्वीत नर्तुत्रयविलंघनमिति॥ इत्यादि देयं कन्याकालो महाग्रंथां
तोज्ञेयः॥ वधूवरयोर्गृहस्पत्यादिशुद्धिर्विवाहे कालशुद्धिर्वर्षणस्यादि घनांतेनांतेषु साधकबाधक
व्यवस्था च ज्योतिषग्रंथेभ्यो विवेचनायेति दिक्॥ अथ ज्येष्ठमासे ज्येष्ठगर्भस्य जन्ममासादौ च सर्वे
षां मंगलं कार्यं॥ निषिद्धं रत्नकोशे जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत्॥ ज्येष्ठमास्याद्यगर्भ
स्य शुभं वर्ज्यं स्त्रियं अपीति॥ अथ कन्यादानं॥ नारदः तत्र याज्ञवल्क्यः॥ पिता माता मही भ्राता सकु
ल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृताव
तौ॥ गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं॥ सकुल्यप्रत्यासंनिकर्मेणाहो पितृकुलस्थस्त
दाभावे मातृकुलस्थः सर्वाभावे जननी॥ प्रकृतिस्थः उन्मादादिदोषहीनः॥ गम्यं गमनार्हं सावर्ण्या

अ ३
ण ०
७ २

प्र २

दिगुणयुक्तं॥ नारदोपि॥ पितादद्यात्स्वयं कन्यां भ्राता वानुमते पितुः॥ मातामहो मातुलश्च सकुल्यो
बांधवस्तथा॥ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते॥ तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥ मनुः॥
यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेदिति॥ अथ विवाहभेदः॥ मनुः॥ ब्राह्मो दैवस्तथाचार्षः प्र
जापत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥ तेषां लक्षणफलं कृत्य कन्यामिति आ
श्वलायनगृह्यखंडे वगंतव्यं॥ एतेषां व्यवस्था स्मृत्यो॥ चत्वारो ब्राह्मणस्याद्याः राज्ञां गांधर्वराक्षसौ॥ रा
क्षसश्चासुरो वैश्ये शूद्रे चांत्यस्तु गर्हितः॥ अंत्ये पैशाचः॥ गांधर्वादिष्वपि नार्या पतिभावोपयः पश्चाद्धो
मादिसप्तपदीतं कार्यं॥ गांधर्वासुरपैशाचा विवाहा राक्षसश्च यः॥ पूर्वं परिग्रहस्तेषु पश्चाद्धोमो विधा
यतइति परिशिष्टात्॥ होमाभावे वरांतराय देया सति तु वेत्ति॥ बोधायनाह॥ बलाद्दयकृता कन्या मंत्रै
र्यदि न संस्कृता॥ अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति॥ बलादिति छलादेरप्युपलक्षणं॥
इत्यादि सर्वं विचार्य परिवित्त परिवेत्तृ दिधिषूपतिदिधिषूक्त्यादि च यथा न स्यात्तथा विचार्य विवाहः
कार्यः॥ अस्माभिस्तु विस्तरभीत्या न लिख्यते॥ अथ मुख्य ब्राह्मणविवाहः तत्र वाग्दानविधिर्बह्वृचगृ
ह्यपरिशिष्टानुसारेणोच्यते॥ ज्योतिर्विदादिष्टे विवाहनक्षत्रादिते शुभकाले द्वौ चत्वारोष्टौ वा प्र

वेदज्ञाः। वरेण तत्पित्रादिना वा अनृक्षरा ऋजवः सन्तु पंथा इति पाठ्या। तास्तावतीभिः पुरंध्रिभिर्मंगलं
गीतनृत्यैश्च सहाकुलं दर्शनपूर्वं मंगलकृतवरयुतावाकन्यागृहमेत्य शुभवस्त्रपीठासने प्राङ्मु
खीं सालंकारां सुवेषां कन्यामुपवेश्य पत्युहस्ते तांबूलादि दत्वा। तत्पित्रादिपुरतः श्रीगणाधिपस्म
रणपूर्वकं प्राङ्मुखासीनाः प्रत्यङ्मुखा वा अमुकप्रवरान्विताऽमुकगोत्रोत्पन्नायामुकप्रपौत्राया
मुकपौत्रायामुकपुत्रायामुकनाम्ने वराय अमुकप्रवरोपेतामुकगोत्रोत्पन्नाममुकप्रपौत्रीममु
कपौत्रीममुकपुत्रीममुकनाम्नीं कन्यां भार्यात्वाय वृणीमह इति ब्रूयुः।। अथ दाता भार्याज्ञाति
बांधवानुमतीं कृत्वाय घोक्तं नतु घवादृणीध्वमिति वदेत्।। एवं सुनर्द्धिः प्रयुज्य प्रदास्यामि वो
ह्रेस्त्रिर्वदेत्।। ततो वरपित्रादिर्गंधाक्षतशुभवस्त्रयुग्मभूषणतांबूलपुष्पादिभिः कन्यां पूजयेत्
तां संप्रसादाय गतमंत्रैस्ततः कन्यादाता प्राङ्मुखः कन्यावामतउपवीश्याचम्य देशकालौ स्मृ
त्वा करिष्यमाणविवाहं वाग्दानमहं करिष्ये।। तदंगं गणपतिपूजनमहं करिष्ये इति संकल्प्य।
गंधादिभिर्दक्षिणांते गणपतिं पूजयित्वा यथाचारं कलशं पूजनादि च कृत्वा स्वस्थाने कन्यां पू
जयित्वा वरं उपवेश्य स्वयं तस्या अंगं प्रत्यङ्मुखमुपविश्य गंधतांबूलादिना पूजयेत्स वदातारं।। तत

४४

तो आता आचारतो हरिद्राखंडपंचदृढपूगफलानि चगंधाक्षतालंकृतानि गृहीत्वा अमुकप्र
वरान्वितामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकनाम्ने वराया मु
कप्रवरान्वितायामुकगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकस्य पुत्रीममुकनाम्नीमि
मां कन्यां ज्योतिर्विदादिष्टे मुहूर्ते अहं दास्ये इति वाचा संप्रददे इति चोक्त्वा।। अव्यंगे पतिते क्लीबे द
शदोषविवर्जिते।। इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधौ।। वरपित्रादिवस्त्रप्रांते तानि पू
गफलानि प्रक्षिप्य प्रतिष्ठामंत्रमनो ज्योतिरित्यादिना वस्त्रे बध्वा ग्रंथिं चंदनेन चर्चयेदित्याचार
प्राप्तं। ततो हरिद्राखंडपंचपूगफलानि तथैव वरपित्रादिर्गृहीत्वामुकगोत्रामुकवरविषये नवंतो
निश्चितान ववित्तिदात्र वस्त्रप्रांतं प्रक्षेपादि कुर्यात्।। ततो दाता।। वाचादत्ता मया कन्या पुत्रार्थं स्वीकृ
ता त्वया।। कन्यावलोकनविधौ निश्चितस्त्वं सुखी भव।। इति वरपितरं प्रति पठेत्।। स च।। वाचादत्
ता त्वया कन्या पुत्रार्थं स्वीकृता मया।। वरावलोकनविधौ निश्चितस्त्वं सुखी भवेति दातारं प्रतिप
ठेत्।। व्यात्रादेशे स्त्रीकर्तव्यरत्नातार्थ पित्रार्थ सरूः कार्यः।। ततो ब्राह्मणाः शिवा आपः संतु। सौमन
स्यमस्तु। अक्षतं॰ दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चास्तु। एतद्वः सत्यमस्त्वित्युक्त्वा। ततो दाता

पात्रस्थसितततंदुलपुंजे शचीमावाह्य षोडशोपचारैः पूजयेत्॥ तां च कन्यैवं प्रार्थयेत्॥ देवेन्द्रा
णि नमस्तुभ्यं देवेन्द्रप्रियभामिनि॥ विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे॥ धान्यं देहि धनं देहि
पश्चन्देहीन्द्रभामिनि॥ यशो देहि सुखं देहि सर्वकार्यकरी भव॥ ततः पुरंध्रिभिर्नीराजनादि
मांगलिकं कार्यं॥ विप्राश्च तां वह्नौ दिक्पूजिता आशीर्भिरभ्यर्चयेयुः॥ ते चाशीश्च तेलक्ष्मीः दक्षिन्तु
उत्येऽरुडपघातिकरस्याचक्षते॥ कुलायिनी॰ उपाधत्तांश्च वनादयः सौभाग्यपदांताः पठनीयाः॥
मनोज्योतिरित्यादयश्च॥ ॥इति वधूवरयोर्वाग्दानविधिः॥ ॥ततो वैवाहिके शुभमुहूर्ते वधूव
रयोस्तैलहरिद्रारोपणादि यथाचारं कार्यं॥ वाग्दानोत्तरं देशांतरगे तु वरे॥ नारदः॥ प्रतिगृह्य तु
यः कन्यां वरो देशांतरं व्रजेत्॥ त्रीनृतूनसमतिक्रम्य कन्यान्यं वरयेद्बुधः॥ वरमरणे तु व
शिष्ठः॥ अद्भिर्वाचा च दत्ता या म्रियेताऽसौ वरो यदि॥ न च तौ दंपती स्यातां कुमारी पितुरेव च॥ य
स्मै वाग्दत्ता तस्य दोषयोगे प्रशस्तवरान्तरलाभे च तस्मै देया सा ह याज्ञवल्क्यः॥ दत्तामपि हरेत्पू
र्वाच्छ्रेयांश्चेद्वर आव्रजेदिति॥ अत्र पूर्वस्य वरदोषयोग इति ज्ञानस्वामि॥ प्रतिश्रुत्याप्यधर्मे योस
युक्तोऽयं न दद्यादिति च स्मृतिः॥ अन्यथा हरणे तु स एवाह सकृत्प्रदीयते कन्या हरंस्तां चोरदंड

भागिति॥ अथ विवाहमंडपप्रकारमाह वशिष्ठः॥ षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं॥ मंड
पं तोरणैर्युक्तं तत्र वेदीं प्रकल्पयेदिति॥ अष्टहस्तं तु रचयेन्मंडपं वा द्विषट्करं॥ द्विषट्कं द्वार
शाकरं॥ वेदीप्रकारमाह नारदः॥ हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंततः॥ स्तंभैश्चतुर्भिः सुश्ल
क्ष्णां वामभागे तु सद्मनश्चतुर्दिक्षु सोपानै रजितां॥ प्रागुदक्प्रवणां रंभास्तंभहस्तशुकादिभि
॥ विचित्रामंकितां कुंभैर्विहितैस्तोरणांकुरैः॥ भृंगारपुष्पनिकरैर्वर्णकैः समलंकृतां॥ विप्राः
शीर्वचनैः सण्येस्त्रिभिर्दीपैर्मनोरमां॥ वादित्रनृत्यगीताद्यैर्हृदयानंदिनीं शुभां॥ एवंविधां
मारुरुक्षेन्मिथुनं साग्निवेदिकामिति॥ हस्तोत्र बध्याः॥ सोपानकारणं पश्चिमभागे परि चतुर्दि
क्षु वा अर्थो यथाचारं सोपानातिरेके न चतुर्हस्तत्वं चतुरस्रता॥ इति विवाहवेदिः॥ अथ विवाहपूर्व
दिने कर्तव्यता॥ वधूपिता वरपिता विवाहपूर्वदिने सुस्नातः सपत्नीकः॥ कृतनित्यं गोकृतमांग
लिकवेशः॥ कृतलेपनं रंगमालिके शुभासने प्राङ्मुखमुपविश्य दक्षिणतः पत्नीं दक्षिणा
त कन्यापरं चोपरं चोपवेश्याचम्य प्राणानायम्येष्टदेवतां गुर्वादिनमस्कारं कृत्वा देशकालौ संकी
र्त्य अस्यामुकशर्मणः पुत्रस्य श्वः करिष्यमाणविवाहांगभूतं स्वस्तिवाचनपूर्वकमविघ्नपूजन

मंडपप्रतिष्ठां मातृकापूजनं च सोऽहं शानांदीश्राद्धं च करिष्ये इति संकल्प्य। उक्तरीत्या स्वस्तिवा
चनादि नि कुर्यात् कन्यापितानु यस्याममुकनाम्न्याः कन्यायाः करिष्यमाणादिसाविशेषसं
कल्प्य सर्वं कुर्यात्॥ मंडपदेवताप्रतिष्ठा चैव कार्या। दूर्वाशमीपल्लवकुशदेववृक्षपल्लवानाम्ना
दिप्रशस्तपत्रवेष्टितसूत्रेणाबोद्धा वेष्टयेत्। तत्रैकं च मुसलमेकं च छुरिकां शस्त्रमध्ये प्रक्षिप्य
वेष्टयेत्सूत्रादिना। तान्विषड्वंशपात्रं निधाय तन्मध्ये उदकसंस्थेषु चेतुर्षु क्रमेण नंदिनीनलि
नीमैत्रेमास्तदुत्तरस्थे मुसलेगर्ते पशुवर्द्धिनीं तदुत्तरस्थे शस्त्रगर्ते भगवतीं तंडुलपूर्णे हरिद्राः
खंडक्रमुकफलयुक्ते न्युब्जशरावपिहिते हरिद्रामंडिते त्राणावेणसहसूत्रवेष्टिते सूक्ष्मकरो ल
अविघ्नसंज्ञं गणपतिं चावाह्य मनोज्योतिरिति प्रतिष्ठाप्य नीराज्य आसनादि आचमनीयां
तोपचारैः पूजयित्वा तैलोद्वर्तनोष्णोदकमभ्यंगस्नानं भूषणवेष्टितानां कारयित्वा गंधादि
दक्षिणांतोपचारैः पूजा कर्तव्या पुष्पांजलीं दत्वा नीराज्योत्थाय सपत्नीकाग्नेयकोणस्थं मं
डपस्तंभोपरि नंदिनामकं वेष्टितं मनोज्योतिरिति स्थापयित्वा स्थिरो भव। अत्र नंदिनीं पूजये
त्॥ नत्वार्थं॥ निकामेनिकामे नः इति मंत्रेण प्रोक्ष्य गंधद्वारामिति गंधं। नंदिन्यै नमः इदमनुलेपनं

अक्षन्नमीमदंत ह्यव इति अक्षतान्। दधिक्राव्णो इति दधि। कांडात्कांडादिति दूर्वापुष्पाणि समर्पयेत्। नं
दि इमानि पुष्पाणि। नंदि अयं धूपः नंदिन्यै। अयं दीपः नंदि इदं नैवेद्यं नंदि इदं तांबूलं। स्तं
भमालाभ्यः उच्चैरुपुणरतिजपः एवं सर्वं पुस्तं नेष्वज्ञेयं॥ ततो नैर्ऋत्यवायव्यईशानस्तंभे
षु मंडपमध्ये उपरिभागे क्रमेण नलिनीमैत्रोमापशुवर्द्धिनीनामकं वेष्टितानि उक्तवत्स्था
पयित्वा पूजयेत्। नलिन्यै नमः। उमायै नमः। मैत्रा। पशुवर्द्धिन्यै। ततो वंशपात्रेण सह भग
वती गौर्यादिमातृकास्थापनं स्वयं पात्रं च स्वयं गृहीत्वा अविघ्नकलशं च पत्नी सहगृह्य गृहं गत्वा
सव्रास्तपण आनोभद्राः स्वस्तिवाचनं स्वस्तिनइन्द्र इत्यादि सुमंगलसूक्तान्यच्छन् मंगलवाद्य
घोषेण गृहद्वारसमीपे गत्वा तत्र द्वारमातृकापूजयेत्। जयाति विजया नामसुशोभना सुपिं
गला॥ नंदका नीत्रापूज्यैते पंचैता द्वारमातृका॥ अथवा॥ जया च विजया चैव नंदकाली च
पिंगला॥ सुभागा चैव विज्ञेया द्वारमातृः प्रपूजयेत्॥ ततो मनोज्योतिरिति प्रतिष्ठाप्य॥ द्वा
रमातृभ्यः इदमनुलेपनं। इमानि पुष्पाणि। अयं धूपोऽयं दीपः। इदं नैवेद्यं। इति द्वारमातृका
पूजयित्वा। ततो गृहांतर्गत्वा प्रशस्तालंकृते शान दिक्रोतंदुलपुंजचतुष्टयोपरि चत्वार्यपि

स्थापयित्वा मनो ज्योतिरिति पठित्वा पूर्ववद्गौर्यादिमातृणां पूजां कुर्यात्। ततो वसोर्द्धाराकारणं
शांतिसूक्तपठनं कुर्यात्। ततो जलमातृकापूजनं॥ मत्सी कूर्मी च वाराही कुकुटी दर्दुरी त
था॥ जलूकी सोमपा श्वैव सप्तैता जलमातरः॥ ॐ भूर्भुवः स्वः जलमातृभ्यो नमः आवाहयामि ज॰
मनो॰ प्रतिष्ठाप्य। ज॰ इदमनुलेपनं। ज॰ इमानि पु॰ ज॰ अयं धूपः ज॰ अयं दीपः ज॰ इदं नै॰॥ ततो नां
दीश्राद्धं। तच्च सपिंडकमपिंडकं वा कुर्यात्॥ अन्यदपि यथाकुलधर्मं सर्वं कुर्यात्। एवमेव मं
डपो मंडपदेवप्रतिष्ठा कुर्यात्॥ चोलोपनयनं ते चकर्त्तव्यमिति। ततः कर्मांगदेवताप्रीत्यर्थं
द्विजसुवासिन्यादीन् भोजयेत्। अनन्यगतो तु सर्वमेतद्विवाहदिने एवं कार्यं। पूर्वमिति अथ
वा यथाकुलधर्मेण कार्यमिति॥ इति सदाशिवदीक्षितात्मजकाशीदीक्षितकृते प्रयोगरत्ने मंड
श्री पदेवप्रतिष्ठा समाप्ता॥ अथ वरस्य वधूगृहगमनं॥ वरः कृतनित्यक्रियविधिवत्कृतस्वस्तिवाच
नो ब्राह्मणैः सहसाश्विकादाहदं मुक्त्वा अनुक्त्वा वा दृष्टो तं नवं श्वेत सदशं संपरिधाय तं वस्त्र
युगलं धृत्वा अलंकृतः प्राग्वत्कृतेष्टदेवतापित्रादिश्च नमस्कृत्य स्तैरनुमोदितो यथानवतिमश्वादि ५७
यानमारुह्य धृतरिशनकृतः स्वर्चितैर्ज्ञातिबांधवैः स्वस्तिमंत्रं इति सुमंगलस्य सूत्रपठनपरैः

ब्राह्मणैः पुरंध्रिभिः पूर्णकलशादर्शयकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यैश्च स
ह वधूगृहं गत्वा तद्वारदेशे प्राङ्मुखस्तिष्ठेत्। नीराजनपूर्णकुंभयुतेः पुरंध्रिजनैः प्रस्तुघातो नीराजि
तो तद्गृहं प्रविश्य दंतगणे मंडपाधःसीमरक्ष देहरितदर्भास्तीर्ये चतुष्पादभद्रपीठे प्राङ्मुख
उपविशेत्॥ ॥अथ मधुपर्कः॥ तत्रायं क्रमः॥ प्राणानायम्य देशकालौ स्मृत्वा कन्यार्थिने गृ
हागताय स्मै स्नातकाय वराय कन्यादानांगत्वेन तं मधुपर्कं करिष्ये॥ इति कन्यार्थिनमिसा
दि द्वितीयांतमुक्त्वा मधुपर्केणार्हयिष्ये इति वा संकल्पयेत्॥ अथ वरस्य वैकल्पिकावधार
णं। यन्मधुन इति मंत्रेण मधुपर्कप्राशने भक्षितशेषस्य प्राग्वासं चरेन्निनयनं॥ ततः कन्या
पिता वरमासनमर्घ्यादिपकल्पयेत्॥ कुशा विष्टरो द्वौ॥ उस्नोदकं। अर्घ्यपात्रं। आचमना
र्थमुदकं दधिमधुघृतं कांस्येनापिहितं मधुपर्कं वासोयुगलं चंदनपुष्पाणि अलंकरणं॥ ए
तान्युपकल्प्य। अथ ध्यपि आसनादरणं। साधु भवानास्ता मर्चयिष्यामो भवंतं मित्यर्घ्यपि
तार्घ्यं प्रतिवदति। अर्चयेत्यर्घ्यस्य प्रतिवचनं॥ अर्घयितु विष्टरादानं॥ अर्घयितु विष्टतिरि
क्तो न्य अर्घ्यं संबोधयति। विष्टरो विष्टरो विष्टरः ततोऽर्घ्यपिता प्रतिगृह्णतामिति च सकृत्॥

प्र॰ग॰ल

ततोऽर्घ्यर्घ्यपितुः सकाशाद्विष्टरं प्रतिगृह्णाति॥ ततस्तं विष्टरमासनेनिधायोपविशति॥
वर्ष्मोस्मीति मंत्रस्याथर्वण ऋषिः अनुष्टुप्छंदः विष्टरो देवता विष्टरोपसने विनियोगः॥
वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः॥ इमं तमभितिष्ठामि यो मा कश्चाभिदासती त्यनेन मं
त्रेण। पाद्यं ततः पाद्यस्य सुखोष्णोदकस्यादानमर्घ्यपितुः ततोन्योर्घ्यं संबोधयति॥ पाद्यं
पाद्यं पाद्यं। ततोर्घ्यं पिता प्रतिगृह्यतामिति सकृत्तु वदेत्तु। ततोर्घ्यार्घ्यपितुः सकाशात्सा
त्रं प्रतिगृह्य भूमौ निधाय तदुदकमंजलिनादाय॥ विराजो दोहोसीति प्रजापति ऋषिः
यजुः॰ आपो देवता पादप्रक्षालने वि॰ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै वि
राजो दोहः इत्यनेन मंत्रेण। ततो वामपादप्रक्षालनमनेनैव मंत्रेण। राजन्य वैश्य योस्तु प्रथ
मं वामपादप्रक्षालनं॥ ततः पूर्ववद्द्वितीयविष्टरः। द्वयोस्तु विशेषः॥ विष्टरं भूमौ कृत्वा त
स्योपरि पादौ कृत्वा॥ वर्ष्मोस्मीत्यनेन मंत्रेण। अर्घ्यपितुः अर्घ्यदानं॥ अन्य आह। अर्घोऽर्घो
र्घः। प्रतिगृह्यतां॥ ततोर्घ्योर्घ्यं प्रतिगृह्णाति॥ आपस्थेति प्रजा॰ यजुः॰ आपो दे॰ अर्घ्य
ग्रहणे विनियोगः। आपस्थ युष्माभिः सर्वान्कामानवाप्नवानीति अनेन मंत्रेण। ततोर्घ्य

४८

शिरसाभिवंद्य प्राग्ग्रा निनयन्नभिमंत्रयते। समुद्रं व इति मंत्रस्याथर्वण ऋषिः। अनु॰ आ॰
अर्घाभिमंत्रणे विनियो॰। समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टास्माकं वी
रा मा परासेचि मत्पयः। इत्यनेन मंत्रेण। अर्घपितुराचमनीयदानं॥ अन्य आह। आचमनी
यमाचमनीयमाचमनीयं। प्रतिगृह्यतामिति यजमानोक्तेः। अर्घपितुः सकाशादाचमनी
यमाचमादाय वामहस्तेन गृहीत्वा किंचिदुदकं दक्षिणचुलुके न गृहीत्वा॥ आमागन्यश
सेति मंत्रस्य परमेष्ठी॰ बृहती॰ आपो दे॰ आचमने वि॰ आमागन्यशसा सं सृज वर्चसा॥ तं
मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनां॥ मित्यनेन मंत्रेण सकृदाचम्य स्मा
र्त्ताचमनं करोति। ततोर्घे अर्घ्यपिता मधुपर्कमाहरेत्॥ अन्य आह॥ मधुपर्को मधुपर्को म
धुपर्कः प्रतिगृह्यतामिति यजमानोक्तेः। ततोर्घपितुर्हस्तस्थितं मधुपर्कमीक्षते। मित्र
स्य त्वेति मंत्रस्य बृहस्प॰ अनुष्टुप्॰ यजुः मधु देवता मधुपर्कावेक्षणे वि॰ मित्रस्य त्वा चक्षु
षा प्रतीक्षे इत्यनेन मंत्रेण। ततः प्रतिगृह्णाति। देवस्य त्वेति प्रजाप॰ गायत्री॰ सविता दे॰
मधुपर्कग्रहणे वि॰। देवस्य त्वा॰ हस्ताभ्यामित्यनेन मंत्रेण प्रतिगृह्य। सव्ये पाणौ कृत्वा

त्रिः प्रयोति १

दक्षिणस्यानामिकयोर्मधुपर्के प्रदक्षिणमालोडयति। नमश्श्यावेति मंत्रस्य प्रजा॰ अनु॰ सवि
तादे॰ निरुक्षणे विनियोगः। ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृंतामीत्यने
न मंत्रेण सकृत्। ततः अनामिकांगुष्ठेन मधुपर्के कदेशं प्रागुदग्वा क्षिपति। पुनरनामि
कयापूर्ववत्त्रयोतिमंत्रेण। पुनरनामिकांगुष्ठेन निरुक्षयति पूर्ववत्। पुनः प्रयोतिपुनर
नामिकांगुष्ठेन निरुक्षयति। एवं त्रिः प्रवणं त्रिनिक्षणं भवति॥ ततो मधुपर्कैकदेशं प्राश्ना
ति॥ यन्मधुन इति मं॰ कुत्सऋ॰ जगती॰ मधुपर्कोदे॰ मधुपर्कप्राशने॰ ॐ यन्मधुनो मधव्यं पर
मᳪं रूपमन्नाद्यं॥ तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोसानी
त्यनेन मंत्रेण॥ पुनरप्यनेनैव मंत्रेण वारद्वयं उच्छिष्टमेव प्राश्नाति॥ ततः प्राच्यां दिशि जनसंचा
रवर्जितप्रदेशे क्षिपेदुच्छिष्टं॥ ततः स्मार्तविधिनाद्भिराचम्य प्राणानसंस्पृशति॥ तद्यथा॥
वाङ्म आस्येस्त्विति मुखमालभेत्। नसोर्मे प्राणोस्त्विति नासिकाछिद्रद्वयं। अक्ष्णोर्मे च
क्षुरस्त्विति चक्षुर्द्वयं युगपत्॥ कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणकर्णं। ततो वामकर्णमने
नैव मंत्रेण॥ ऊर्वोर्मे ओजोस्त्विति ऊरुद्वयं॥ अरिष्टानि मेंगानि तनूस्तन्वा मे सह सं[illegible]तिशिरः।

बाह्वोर्मे बलमस्तु १

प्रभृति पादांतानि सर्वांगान्यालभते॥ ततः यजमानः स्वहस्तो वराय गां निवेदयत्॥
गौर्गौर्गौरिति ततो वरः॥ मातारुद्राणामिति मंत्रस्य ब्रह्मादे॰ त्रिष्टु॰ गौर्दे॰ तामभिमंत्रयो॰
ॐ मातारुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः॥ प्रनुवोचं चिकितुषे ज
नाय मागामनागामदितिं वधिष्ट॥ मम चामुकशर्मणो यजमानस्य पाप्मानᳪं हनोमीति
गवालंभपक्षे प्रतिब्रूयात्। यद्यपि सूत्रकारेण गवालंभो नियमेनोक्तस्तथापि मधुपर्को
पशोर्वर्ज्जनीय इति स्मृत्यंतरनिषेधबलात्साप्येव। अतः कलियुगे उत्सर्ग एव उत्सर्गपक्षे
प्रयोगः। मातारुद्राणामित्युक्त्वा मम चामुकशर्मणो यजमानस्य पाप्मा हतः॥ ॐ उत्सृज
तत्तृणान्यत्त्विति। ॐकारमुपांशूक्त्वा उत्सृजते साधुच्चैः अनेनैव विधिना संवत्सरा
दूर्ध्वं स्वऋत्विक्राजा वा स्नातको वा। उत्कृष्ट जाति समाने जातिर्वा सख्या आगतिस्तं॰
अर्चयेत्॥ सोमिनयक्ष्यमाणः संवत्सरादर्वागपि ऋत्विजो मधुपर्केणार्चयेत्॥ ततः
कन्यापिता वराय वाससी दद्यात्। वरवस्त्रं परिधत्ते। परिधास्य इति मंत्रस्य आलंबाय
नऋषिः पंक्तिछं॰ वासो देवतां वस्त्रपरिधाने॥ परिधास्यै संव्ययिष्ये इति मंत्रेण। यशो

॥ यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि॥ शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये॥

प्र॰ग॰ल

द्यावापृथिवी यशसेंद्राय बृहस्पती॥ यशो भगश्च माविदद्यशो मा र
पवीतधारणं पूर्ववत्॥ यशसामेतिमंत्रस्यालंबायनऋ॰ पंक्ति छं॰ लिंगोक्तादे॰ उत्तरीयधारणे॰ १
यशसामा॰ प्रतिप्रधतामितिमंत्रेणोत्तरीयं॥ ततोद्विराचमनं॥ कन्यापित्रादत्तं चंदनं नालेअनुलि २
प्य॥ सुचक्षाअहमितिमंत्रस्य प्रजापतिऋ॰ यजु छं॰ आशीर्दे॰ जपेवि॰ सुचक्षा अहमक्षीभ्यां भूयासं ३
मिसमुपमंत्रजपति॥ या आहरज्जमदग्निरितिमं॰ भारद्वाज॰ अनुष्टुप्॰ सुमनसोदे॰ पुष्पग्रहणे॰
या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय॥ पापुष्पग्रहणं॥ यद्यशोऽप्सरसामिति मं॰ भरद्वाज॰ अनु॰ सु
मनसोदे॰ पुष्पबंधनेवि॰ यद्यशोऽप्सरसामिंद्रश्चकार विपुलं पृथु। तेन संग्रथिताः सुमनस आबध्नामि यशो मयि॥ अनेन मंत्रेण पुष्पबंधनं॥ अलंकरमितिमंत्र ४
स्य भरद्वाजऋ॰ उष्णिक् छं॰ अलंकरणदे॰ अलंकरणधारणेवि॰॥ अलंकरणमसि सर्वं मे भूयासम्। अने
नेनमंत्रेण कर्णयोरलंकरणं धारणं॥ ॥इति मधुपर्कः समाप्तः॥ ॥अथ कन्यापितास्नातां

नयो ६

परिहिता वस्त्रयुग्मां ततः सूत्रवेष्टितोपलसहितं दृषदुपरि हरिद्रानिर्मितां गौरीं हरसौभाग्यादि
कामनया पूजयित्वा इन्द्राणीं च तत्रैवाक्षतपुंजे पूजयित्वा प्रार्थयेत्॥ देवेन्द्राणि नमस्तुभ्यं देवे
न्द्रप्रियकामिनी॥ विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे॥ इति ततो गौरीं सौभाग्यादि प्रार्थयमा ८
ना तत्रैव तिष्ठेत्। ततो वरः प्राणानायम्य देशकालौ स्मृत्वा॥ धर्मप्रजासंपत्त्यर्थं दारपरिग्रहणमहं
करिष्ये।

मिंद्रश्चकार विपुलं पृथु॥ तेन संग्रथिताः सुमनस आबध्नामि ७

५

अ॰ द्यौश्चा माद्रेयो हि याथा॥ ता॰ अर्हं प्रति
प्र॰ शान्ति यशस्वा च ५

तदंगतया विहितं अग्निप्रतिष्ठापनमहं करिष्ये। मंडपस्येशान्यां दिशि पंचभूसंस्कारान्कृत्वा
लौकिकाग्नेर्निर्मंथ्य वा स्थापयित्वा वरैवैकल्पिकावधारणं कुर्यात्॥ लौकिकाग्निस्थापनं गौरीपरि
पायनं। कुमार्या वासः परिधानादि गृहमध्ये। अग्नेर्दक्षिणतः कुंभं धृत्वा। तेजन्यां दक्षिणपादेन परि
वर्तनं। उत्तरे पात्रासादनं। द्वे पवित्रे। ताम्रमयी आज्यस्थाली। पालाशाः समिधः प्रां वा वा चारो। समिद्ध
त्तमे आज्यभागौ। पूर्णपात्रं। राष्ट्रभृद्धोमः। जयाहोमः। अभ्यातानहोमः। सुगन्तुपंथामिति स्वाहुत्यंते। परं
मृत्योरित्याहुतिः। वध्वा आनुडुहे चर्मणि दर्भेषु वा शयनम्। आविरात्रं ब्रह्मचर्यं सुभयोः॥ एतान्वैकल्पि
कपदार्थान्नहंश्ये। ततः पश्चात् पाटुलकं स्थापयेत्॥ ॥अथ कन्यादानादि॥ ब्राह्मणाः स्वलंकृते
वेश्मनि मंगलगीत तूर्यनिर्घोषे क्रियमाणे पूर्वापरभागयोर्हस्तांतरालं तत्रस्वस्तिकांकितं मंतःप
टं वरास्ययोर्मध्ये उत्तरदशाधारयेयुः॥ यथापूर्वराद्याप्रत्यङ्मुखं वरं पश्चिमराशौ च प्राङ्मुखीं क
न्यां तंडुलगुडजीरकयुतां जलमनो स्थापयित्वा द्विजाः स्वस्ति न इन्द्रो वृद्धश्रवा इति सूक्तं पठेत्। पुरंध्रयो
मंगलगीतिं कुर्युः। वधूवरौ योगमनसौ स्वेष्टदेवता ध्यायंतो समाहितौ तिष्ठेताम्॥ अथ ज्योतिषिकेन मं
गलाष्टकपाठपूर्वकं सुमुहूर्तोस्त्विति देवलग्नमिति पठिते प्रतिष्ठे काले सद्यो तः पटमुद्गगयसा

प्र॰ग॰ल

येकन्यावराभ्यांपरस्परस्मिन्नंजलिस्थं तंदुलगुडजीरकविकीरणं कारणीयं॥ ततः वरः प्राङ्मुखं
वधूं प्रत्यङ्मुखीं कारयित्वा॥ ततः कन्यापिता वस्त्रद्वयं वराय प्रयच्छति॥ तयोर्मध्ये एकं वरः कुमा
रीं परिधापयति॥ जरांगच्छेतिमंत्रस्य प्रजापति॰ त्रिष्टुप्छं॰ वासोदेवता वस्त्रपरिधाने वि॰। जरांग
च्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा॥ शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्य
यस्वायुष्मतीदं परिधत्स्व वासः इत्यनेन मंत्रेण॥ या अकृंतन्निति मंत्रस्य प्रजा॰ त्रि॰ वासोदे॰ उत्तरीयव
स्त्रपरिधाने वि॰॥ या अकृंतन्नवयं या अतन्वत॥ याश्च देवीस्तंतूनभितो ततंथ तास्त्वा देवी जरसे
संव्ययस्वायुष्मतीदं परिधत्स्व वासः इत्यनेन मंत्रेणोत्तरीयमपवेधनं वरस्य मंत्रपाठः॥ अथ क
न्यायाः पिता वरकुमार्यो समंजयति परस्परं समंजेथामित्यनेन मंत्रेण प्रेक्षणासमंजनं सन्मुखी
करणं॥ समंजंत्विति मंत्रस्याथर्वणा॰ अनु॰ लिंगो॰ समंजने विनि॰॥ समंजंतु विश्वेदेवाः समापो
हृदयानि नो॥ सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ॥ इत्यनेन मंत्रेण सन्मुखीकृतौ वरः पठति॥ त
तो वधूवरौ उपविशतः। प्राङ्मुखो वरः उपविशेत् प्रत्यङ्मुखी कन्या॥ ॥अथ कन्यादानं॥ तत्रायं
क्रमः॥ दाता वधूवरयोर्दक्षिणतः॥ स्वदक्षिणहस्ते दर्भान् स्वपत्नीसहितः॥ उदङ्मुख उपविश्य॥ ब

५१

द्धशिखः शुचिराचम्य पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य मम समस्तपितृणां निरतिशयानं
द ब्रह्मलोकावाप्त्यादि कन्यादानकल्पोक्त फलावाप्तये अनेन वरेणास्यां कन्यायां समुत्पादयिष्यमा
णसंतत्या द्वादश वरान् द्वादशापरान् पुरुषांश्च पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये ब्रा
ह्म विवाहविधिना कन्यादानमहं करिष्ये॥ नेत्रे दो॥ इति कुशाक्षतयुतजलेन संकल्प्य॥ ने वाक्यं॥
अमुकगोत्रस्य अमुकामुकप्रवरस्यामुकशर्मणः प्रपौत्रायामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौ
त्रायामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रायेति वरपक्षे॥ कन्यापक्षे तु विशेषः। अमुकगो
त्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीं। अमुक
गोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीं॥ एवमेव पुनरद्वयमभिधीयते॥ कन्यापिता कुशजलाक्षत
पाणिः उदङ्मुखोपविष्टः प्राङ्मुखोपविष्टाय वराय प्रत्यङ्मुखोपविष्टां कन्यां यथाशक्त्यालंकृतां अ
मुकगोत्रायामुकप्रवरायामुकवेदाध्यायिने अमुकशर्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे॥ इतरेव
रपक्षे॥ वर्मणे गुप्ताय दासायेति विशेषः॥ अमुकगोत्रामुकामुकप्रवराममुकनाम्नीमिमां कन्यां
यथाशक्त्यालंकृतां प्रजापतिदैवत्यां पुरा पोक्त शतगुणीकृत ज्योतिष्टोमातिरात्रफलप्राप्तिकामः

प्र॰ग॰ल॰

कन्यादानफलप्राप्तिकामो वा भार्यात्वेन तुभ्यमहं संप्रददे॥ स्फ त्वा कुशाक्षतजलं कन्याहस्तवरस्य
दक्षिणहस्ते दद्यात्॥ वरस्तु स्वस्तीत्युक्त्वा कन्यायां दक्षिणांसमनिस्पृश्य॥ द्यौस्त्वा ददातु पृथिवी त्वा प्र
तिगृह्णात्विति अनेन मंत्रेण प्रतिगृह्णामि॥ यस्त्वया धर्मश्चरितव्यः सोनया सह॥ धर्मे चार्थे च कामे
च त्वयेयं नातिचरितव्या नातिचरामीति वरः॥ अथ को दादिति कामस्तुतिं पठेत्॥ को दात्॰ कामे॰
तन्ने॥ अथ कन्यापिता कृतेन तत्कन्यादानस्य प्रतिष्ठासिध्यर्थं ममां दक्षिणां तुभ्यमहं संप्रददे इति जलं
यथाशक्ति सुवर्णदानं दक्षिणात्वेन वरहस्ते त्वा न ममेति वदेत्॥ ॐ स्वस्तीति वरः॥ ततो दाता भोज
नगोमहिषगजदासीदासभूलंकारादि यथाविभवं संकल्पपूर्वकं दद्यात्॥ तत्र मंत्रपाठः॥ यज्ञसा
धनभूता या विश्वस्याघप्रनाशिनी॥ विश्वरूपधरो देवः प्रीयतामनया गवा॥ गोः॥ सर्वस्याचश्रया
भूमिर्वराहेण समुद्धृता॥ अनंतपुण्यफलदा अतः शांतिं प्रयच्छ मे॥ भूः॥ इयं दासी मया तुभ्यं श्री॰
वत्स प्रतिपादिता॥ सदा कर्मकरी भोग्या यथेष्टं नद्रमस्तु मे॥ दासीः॥ हिरण्यगर्भसंभूतं सौवर्णीचां
गुलीयकं॥ सर्वप्रदं प्रयच्छामि प्रीणातु कमलापतिः॥ अंगुलीयकस्य॥ अभूत्वं शयनं नित्यं मनन्ता ५२
श्रियमुन्नती॥ सौभाग्यदं हि मे नित्यं शय्यादानेन केशव॥ शय्या॥ क्षीरोदमथनात्सर्वं समुद्धृतं कुंडलद्वयं॥

श्रिया सह समुद्भूतं वं दे श्रीः प्रीयतामिती॥ कुंडलद्वयोः॥ इदं गृहं गृहाणं च सर्वोपस्कारसंयुतं॥ तव वि
प्रप्रसादेन ममास्त्वनिमत्तं फलं॥ गृहस्य॥ परोपवादपैशुन्यादभक्षस्य च भक्षणात्॥ उत्पन्नं पापप्र
नेन ताम्रपात्रस्यन स्पतु॥ ताम्रपात्रे॥ इन्द्रादिलोकपालानां या राज्यमहिषी सुतं॥ महिषासुर
स्य जननी सास्तु मे सर्वकामदा॥ महिषी॥ कांस्यपात्रप्रदानेन तानि नंश्यंतु मे सदा॥ कांस्यपू
त्रादि॥ अपरे तु होमांतरे रजतसुवर्णादिदानमिच्छंति॥ अत्र देशाचारतो मवस्था कर्तव्या॥
ततो दुग्धाक्तेन द्विगुणशुक्लसूत्रेण दंपती कंठदेशेन दृशानमारभ्य पंचवारं चतुर्वारं वा प्रद
क्षिणं वेष्टयेत्॥ परिधा अनेन मंत्रेण परित्वा गिर्वणः जुष्टयः इत्यनेन मंत्रेण। ततः कंठदे
शस्थसूत्रमंधोनिकास्य कुंकुमोक्तं मूर्ध्नायुक्तं च कृत्वा तेन दक्षिणाखंडं बध्वा वधूवामह
स्त प्रकोष्ठे वरो बध्नीयात्। यदाबध्नमिति मंत्रेण। कटिदेशस्थसूत्रमुपरिनिष्कास्य तादृ
शं कृत्वा वरदक्षिणहस्तप्रकोष्ठे वधूर्बध्नीयात्॥ तेनैव मंत्रेण। एवं पित्रा दत्तां कन्यां गृहीत्वा
प्रतिगृह्य स्थानान्निष्क्रामति। यदैषीति मंत्रस्याथर्वण ऋषिः अनुष्टु॰ लिं॰ निष्क्रमणे वि॰॥ यदै
षि मनसा दूरं दिशोनुपवमानो वा॥ हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वमु कीर्त्य॰ मंत्रेण।

प्र॰ग॰ल

निष्क्रमणप्रभृत्येकः पुरुषः उदकुंभस्कंधेक्त्वा दक्षिणतोग्नेर्वाग्यतः स्थितो भवस्करतो वा। अभिषेकपर्यंतं॥ अथैनौ वधूवरौ समीपतं गतौ कन्यापिताप्रेषयनीय वरस्य रं समीक्षेथामिति प्रेषेण॥ ततस्तौ वधूवरौ परस्परं समीक्षणं कुरुतः वरस्तु समीक्षमाणो मंत्रं पठति। अघोरचक्षुरमितिमंः प्रजाः आधास्य त्रिष्टुः द्वितीयस्यानुष्टुप्ः तृतीयस्य चतुर्थस्य त्रिष्टुकुमारीदेवता॥ समीक्षणे विनियोगः॥ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः॥ वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे॥ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः॥ तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ सोमो ददद्गंधर्वाय गंधर्वो ददद्ग्नये॥ रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां॥ सा नः पूषा शिवतमामैरय सा न ऊरू उशती विहर॥ यस्यामुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या इत्येतान्॥ एके आचार्याः॥ प्रदक्षिणमग्निमानीय कन्यावासः परिधानादिकं कुर्वंति॥ वधूवरौ अग्निं प्रदक्षिणीकृत्याग्नेः पश्चात्स्वोपसादिते कटे तृणपूलके वा उपविशतः। तत्र दक्षिणपादेना क्रम्योपविशति वरः। वरस्य दक्षिणतो वधूः॥ अथ वरो देवताभिध्यानं करोति॥ तद्यथा॥ विवाहकर्मण्याहं यक्ष्ये॥ तत्र प्रजापतिं इंद्रं। अग्निं। सो ५३

२ वरुणं आदित्यादितिं [illegible]

अ
मं। वायुं। सूर्यं। अग्नी वरुणावग्निवरुणौ। अग्निं। वरुणं। सवितारं। विष्णुं। विश्वान्देवान्मरुतः स्वर्कान्। ऋतासाहं। ऋतधामानं। अग्निं। गंधर्वं। ओषधीः। अप्सरसः। मुदः। संहितं। विश्वसामानं। सूर्यं। गंधर्वं। मरीचीः। अप्सरसः। आयुवः। सुषुम्णं। सूर्यरश्मिं। चंद्रमसं। गंधर्वं। नक्षत्राणि। अप्सरसः। बेकुरीः। इषिरं। विश्वव्यचसं। वातं। गंधर्वं। आपः। अप्सरसः। ऊर्जः। भुज्युं। सुपर्णं। यज्ञं। गंधर्वं। दक्षिणाः। अप्सरसः। स्तावाः। प्रजापतिं। विश्वकर्माणं। मनसं। गंधर्वं। ऋक्सामानि। अप्सरसः। एष्टीः। चित्तं। चित्तिं। आकूतं। आकूतिं। विज्ञातं। विज्ञातिं। मनः। शक्वरीः। दर्शं। पौर्णमासं। बृहतं। रथंतरं। प्रजापतिं। जयं। इंद्रं। अग्निर्भूतानामधिपतिं। इंद्रं ज्येष्ठानाम। यमः पृथिव्याधि। वायुरंतरिक्षस्याधिप। सूर्योदिवोधिप। चंद्रमसं नक्षत्राणाम। बृहस्पतिर्ब्रह्मणोधिप। मित्रः सत्यानामधिप। वरुणोपामधिप। समुद्रस्रोत्यानामधिप। अन्नं साम्राज्यानामधिप। सोम ओषधीनामधिप। सविता प्रसवानामधिप। रुद्रः पशूनामधिप। त्वष्टा रूपाणामधिप। विष्णुः पर्वतानामधिप। मरुतो गणानामधिप। पितरः पितामहान्। परानवरान्। ततान्। ततामहान्। अग्निं। अग्निं। अग्निं।

४ गो

प्र·ग·ल

वैवस्वतं। मन्त्रः। एतान् सर्वानाज्येनाहुत्य स्त्रे॥ अथ कन्यादेवतानिध्यानं करोति॥ अग्निं। अग्निं
।भगं।लाजो। रहृयस्त्रे॥ अथ वरः॥ प्रजापतिं। अग्निं स्विष्टकृतमाज्येनाहृयक्ष्ये॥ ततो ब्रह्मोप
वेशनादि चरुवर्जं पर्युक्षणांतं कुर्यात्॥ तत्र विशेषः॥ आसादितपात्राणामुत्तरे शमीपत्रमिश्रा
लाजः॥ अश्मा अखंड लोहितमानुडुहं चर्माभ्रातातरं नाबेसं कल्प्यः॥ शूर्पी दृढपुरुषः॥ वरश्चेद् द्वे
भवति॥ तदा दृढपुरुषस्येनोपकल्पनं। आचार्याय वरद्रव्यं पात्रासादनानंतरमेतान्युपकल्प्य
प्रोक्षणकाले प्रोक्षयेत्॥ पर्युक्षणांते स्रुवप्रतपनमादाय दक्षिणं जान्वाच्य ब्रह्मणान्वारब्ध उक्त(
विधिना स्वाहा स्यास्तृणस्रुवेणाज्यमादाय॥ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ इंद्राय स्वाहा॥
इदमिंद्रा·। अग्नये स्वाहा॥ इदम·। सोमाय स्वाहा॥ इदं सो·। भूर्भुवस्वरिति महाव्याहृतीनां प्रजा
पतिऋषिः ऋमिणगायत्र्युष्णिगनुष्टुप्छंदांसि। अग्निवायुसूर्या देवता होमे वि·॥ भूः स्वाहा॥
इदम·। भुवः स्वाहा॥ इदं वायव·। स्वः स्वाहा॥ इदं सूर्या·। त्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टुप्छंदः
अग्नीवरुणौ दे· होमे वि·। त्वन्नो अग्ने· ष्य स्म स्वाहा॥ इदमग्नीवरुणाभ्यां न मम॥ सत्वन्नो(
अग्न इति वा· त्रि· अग्नीवरुणौ दे· हो·। सत्वन्नो· एधि स्वाहा॥ इदमग्नीवरुणाभ्यां न मम॥

५७

विश्वेभ्यो ३

अयाश्चाग्न इति वामदे· बृहती छंदः अग्निर्दे· होमे वि·॥ अयाश्चाग्ने· भेषजं स्वाहा॥ इदमग्नये अ
यसे न मम॥ ये ते शतमिति वा· त्रि· वरुणसविताविष्णुर्विश्वेदेवा मरुतः स्वर्का देवता होमे वि·॥ ये ते श
तं· स्वर्का स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम॥ उदुत्तममिति शुनःशे
प ऋ· त्रिष्टुप्· वरुणो देव· होमे वि·। उदुत्तमं· स्याम स्वाहा॥ इदं वरुणायादित्यायादितये न मम॥ अ
थ ब्रह्मणान्वारब्धो राष्ट्रभृतो जुहोति॥ तद्यथा॥ ऋताषाडिति प्रजा· साध्या वा ऋषयः छंदः यजुः ऋ
ताषाडृतधामाग्निर्देवता गंधर्वो देव· होमे वि·॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पा
तु तस्मै स्वाहा वाट्॥ इदमृताषाहे ऋतधाम्ने अग्नये गंधर्वाय न मम॥ ऋताषाडिति प्र· यजुः
ओषधयोऽप्सरसो मुदो दे· होमे वि· ऋताषाट्· गंधर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः(
स्वाहा॥ इदमोषधीभ्योऽप्सरोभ्यो मुद्भ्यो न॥ संहित इति प्र· यजुः संहितो विश्वसामा सूर्यो
गंधर्वो दे· होमे वि·। संहितो विश्वसामा सूर्यो गंधर्वः स न· वाट्॥ इदं संहिताय विश्वसाम्ने सू(
र्याय गंधर्वाय न॥ संहित इति प्र· य· मरीचयोऽप्सरस आयुवो दे· हो·। संहितो· गंधर्वस्त
स्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा॥ इदं मरीचीभ्योऽप्सरोभ्य आयुभ्यो न मम॥ सु

प्र॰ग॰ल

षुम्णः सूर्यरश्मिरिति प्र॰ य॰ सूर्यरश्मिश्चंद्रमा गंधर्वो देव॰ होमे वि॰ । सुषुम्णः सूर्यरश्मिश्चंद्रमा
गंधर्वः स न॰ वा॰ ॥ इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय न मम । पुनः सुषुम्ण इति प्र॰ य॰ न
क्षत्राण्यप्सरसो भेकुरयो दे॰ होमे वि॰ ॥ सुषुम्णः नक्षत्राण्यप्सरसो भेकुरयो ना॰ इदं नक्षत्रेभ्यो
ऽप्सरोभ्यो भेकुरीभ्यो न मम ॥ इषिर इति प्र॰ य॰ इषिरो विश्वव्यचा वातो गंधर्वो दे॰ होमे वि॰ ॥ इषि
रो विश्वव्यचा वातो गंधर्वः स न॰ वा॰ ॥ इदमिषिराय विश्वव्यचसे वाताय गंधर्वाय न मम ॥ इषिर
इति प्र॰ य॰ तस्यापो अप्सरस ऊर्जो देवता होमे वि॰ ॥ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो अ
प्सरस ऊर्जो नाम ताभ्यः स्वाहा ॥ इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यो न मम ॥ भुज्युरिति प्र॰ य॰ भुज्युः सुप
र्णो यज्ञो गंधर्वो देवता होमे वि॰ । भुज्युः सुपर्णो यज्ञो गंधर्वः स न॰ वा॰ ॥ इदं भुज्यवे सुपर्णाय य
ज्ञाय गंधर्वाय न मम ॥ भुज्युरिति प्र॰ य॰ दक्षिणाप्सरसस्तावा दे॰ होमे वि॰ ॥ भुज्युः सुपर्णो यज्ञो
गंधर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा ॥ इदं दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यो न म
म ॥ प्रजापतिरिति प्र॰ य॰ प्रजापतिर्विश्वकर्मा मनो गंधर्वो दे॰ होमे वि॰ ॥ प्रजापतिर्विश्वकर्मा
मनो गंधर्वः स न॰ वा॰ ॥ इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय न मम ॥ प्रजापतिरिति प्र॰

य॰ ऋक्सामान्यप्सरस एष्टयो दे॰ होमे वि॰ ॥ प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्य
प्सरस एष्टयो नाम ताभ्यः स्वाहा ॥ इदमृक्सामेभ्योऽप्सरोभ्य एष्टिभ्यो न मम ॥ एवं स्रुवेणादायाज्येन ।
अपरे त्वन्यथा मंत्रप्रयोगं कुर्वंति ॥ तद्यथा ॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पा
तु तस्मै स्वाहा वाट् ॥ इदं प्रथमं तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहेति द्वितीयः ॥ एवं सर्वमं
त्रेषु त्यागः ॥ अस्मिन्पक्षे तु त्यागास्तु यत्न एव ॥ अथ जयाहोमः ॥ चित्तं चेत्यादि द्वादशमंत्राणां परमे
ष्ठी॰ अनुष्टुप्छंदः सर्वाणि यजूंषि दे॰ लिं॰ होमे वि॰ ॥ चित्तं च स्वाहा ॥ इदं चित्ताय न मम ॥ चित्तिश्च॰ ॥
इदं चित्यै॰ आकूतं च॰ इदमाकूताय॰ आकूतिश्च॰ इदमाकूत्यै॰ विज्ञातं च॰ इदं विज्ञाताय॰ विज्ञाति
श्च॰ इदं विज्ञात्यै॰ मनश्च॰ इदं मनसे॰ शक्वरीश्च॰ इदं शक्वरीभ्यो॰ दर्शश्च॰ इदं दर्शाय॰ पौर्णमासं च॰ इदं पौ॰
बृहच्च॰ इदं बृहते॰ रथंतरं च॰ इदं रथंतराय॰ ॥ रथंतरे सेत देवतानां पदानां चतुर्थ्यंतेन प्रयोगमिच्छं
ति ॥ तदनुपूर्वं ॥ एते मंत्राः न तु देवतापदानि ॥ प्रजापतिर्जयानिमं॰ परमेष्ठी॰ त्रिष्टुप्॰ लिं॰ होमे वि॰
प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु ॥ तस्मै विशः समनमंत सर्वाः स उग्रः स इ
हव्यो बभूव स्वाहा ॥ इदं प्र॰ ॥ अथाभ्यातानहोमं करोति ॥ तद्यथा ॥ अग्निर्भूतानामिति प्र॰ त्रि

प्र·गा·न्

अग्निर्भूतोर्दे· होमेवि·॥अग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्य॰
स्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्या ँ स्वाहा॥इदमग्नये भूतानामधिपतये न मम॥इन्द्रो ज्येष्ठा
नामितिप्र·त्रि·इन्द्रोर्दे· होमेवि·॥इन्द्रो ज्येष्ठानामधि·।इदमिन्द्राय ज्येष्ठानाम·॥यमः पृथिव्या इति
प्र·त्रि·पृथ्वीर्दे· होमेवि·॥यमः पृथिव्याधिपतिः·इदं यमाय पृथिव्या अधिपतये·॥वायुरितिमं·
प्र·त्रि·वायुर्दे· हो·॥वायुरंतरिक्षस्याधिपति·इदं वायवे अंतरिक्षस्याधिपतये·॥सूर्य इतिमं·प्र·
त्रि·सूर्योर्दे· होमेवि·॥सूर्यो दिवोधिपतिः·इदं सूर्याय दिवोधिपतये·॥चंद्रमा नक्षत्राणामितिमं·प्र· त
त्रि·चंद्रमार्दे· होमेवि·॥चंद्रमा नक्षत्राणामधिपति·इदं चंद्रमसे नक्षत्राणामधिपतये·॥बृहस्प त
तिरितिमं·प्र·त्रि·बृहस्पतिर्ब्रह्मणोर्दे· होमेवि·बृहस्पतिर्ब्रह्मणोधिपति·इदं बृहस्पतिर्ब्रह्म
त णोधिपतये·॥मित्रः सत्यानामितिमं·प्र·त्रि·मित्रसार्दे· होमेवि·॥मित्रः सत्यानामधिपतिः·।इदं मित्रा
य सत्यानामधिपतये·॥वरुण इतिमं·प्र·त्रि·वरुणोर्दे·होमेवि·॥वरुणोपामधिपति·इदं वरु
णाय अपामधिपतये·॥समुद्र इतिमं·प्र·त्रि·समुद्रस्रोत्यार्दे· होमेवि·॥समुद्रः स्रोत्यानामधि ५६
पति·इदं समुद्राय स्रोत्यानामधिपतये·॥अन्नं ँ साम्राज्यानामितिमं·प्र·त्रि·अन्नं ँ·साम्रा॰

मधिपतिनमाव·

ज्योर्दे·हो·॥अन्नं ँ साम्राज्यानां·इदमन्नाय साम्राज्यानामधिपतये·॥सोम ओषधीनामि·प्र·त्रि·
सोम ओषधीर्दे·हो·॥सोम ओषधीनामधि·इदं सोमाय ओषधीनामधिपतये·॥सविता प्रसवा॰
नामितिमं·प्र·त्रि·सवितार्दे·हो·॥सविता प्रसवानामधिपत·इदं सवित्रे प्रसवानामधिपतये·॥रु॰
द्रः पशूनामितिमं·प्र·त्रि·रुद्रः पशून्दे·हो·॥रुद्रः पशूनामधिपतयस्ते·इदं रुद्राय पशूनामधि
पतये·॥अथ त्वष्टा॥त्वष्टा रूपाणामितिमं·प्र·त्रि·त्वष्टारूपोर्दे·हो·॥त्वष्टा रूपाणामधिपतयस्ते·
इदं त्वष्ट्रे रूपाणामधिपतये·॥विष्णुः पर्वतानामितिमं·प्र·त्रि·विष्णुः पर्वतोर्दे·हो·॥विष्णुः पर्वता
नामधिपतयस्ते·इदं विष्णवे पर्वतानामधिपतये·॥मरुतो गणानामितिमं·प्र·त्रि·मरुतो गणो
र्दे·हो·॥मरुतो गणानामधिपतयस्ते·इदं मरुद्भ्यो गणानामधिपतये·॥पितरः पितामहा इतिमं·
प्रजा·त्रि·पितरोर्दे·हो·॥पितरः पितामहाः परेवरे ततास्ततामहाः॥इह मावंत्व·साँ स्वाहा॥
इदं पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्यस्ततामहेभ्यो न मम॥उदकोपस्पर्शः॥अग्निरै
त्विति मं·प्र·अग्निर्दे·हो·॥अग्निरैतु प्रथमो देवतानां ँ सोस्यै प्रजां मुंचतु मृत्युपाशात्॥त
दयं ँ राजा वरुणोनुमन्यतां यथेयं ँ स्त्री पौत्रमघं न रोदात् स्वाहा॥इदमग्नये न मम॥इमामग्नि

रितिमं·प्र·त्रि·अग्निर्दे·हो॥इमामग्निस्त्रायतांगार्हपत्यंप्रजामस्यैनयतुदीर्घमायुः॥अशून्योप
स्थाजीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामियं स्वाहा॥इदमग्नयेनमम॥स्वस्तिनइतिमं·
प्र·त्रि·अग्निर्दे·हो·॥स्वस्तिनोअग्नेदिवाए॰थिव्याविश्वानिधेह्ययथायजत्र॥यदस्यांमहिदिवि
जातंप्रशस्तंतदस्मासुद्रविणंधेहिचित्रंस्वाहा॥इदमग्नयेनमम॥सुगंनुपंथामितिमं·प्र·त्रि·वे
वस्वतोदे·हो·॥सुगंनुपंथांप्रदिशनएहिज्योतिष्मध्येह्यजरन्नआयुः॥अपैतुमृत्युरमृतंमआ
गाद्वैवस्वतोनोअभयंकृणोतुनःस्वाहा॥इदंवैवस्वतायनमम॥परंमृत्युरितिमं·कुसुकऋ·त्रि·
मृत्युर्दे·हो·परंमृत्योअनुपरेहिपंथांयस्तेअन्यइतरोदेवयानात्॥चक्षुष्मतेशृण्वतेतेब्रवी
मिमानःप्रजांरीरिषोमोतवीरान्स्वाहा॥इदंमृत्यवेनमम॥केचित्सात्रानांतेदूर्ध्वेपरंमृत्यु वि
विच्छति॥अथकुमार्याभ्राताशमीपलाशमिश्रान्लाजान्कन्यांजलौनिधाय कुमार्यंजल्या
वावपतितान्लाजान्भ्राञ्जुरवीतिष्ठतिकुमारीअंजलीनावग्नौजुहोति॥तद्यथा॥अर्यम
णमितिमं·अथर्वणऋ·अनुष्टुप्·अग्निर्दे·लाजाहो·॥अर्यमणंदेवंकन्याअग्निमयक्ष
त॥सनोअर्यमादेवःप्रेतोमुंचतुमापतेःस्वाहा॥इत्यनेनमंत्रेणांजलिस्थितलाजानांतृती

यांशंजुहोति॥इदमग्नयेनमम।अर्यम्णेवा॥इयन्नार्युपब्रूतइतिमं·अथर्वणऋ·अनुष्टुप्·अग्नि
र्दे·हो·॥इयन्नार्युपब्रूतेलाजानावपन्तिका॥आयुष्मानस्तुमेपतिरेधन्तांज्ञातयोममस्वाहा॥
इत्यनेनमंत्रेणांजुहोति॥इदमग्नयेनमम॥इमान्लाजानानामितिमं·अथर्वणऋ·अनुष्टुप्·अग्नि
र्दे·हो·॥इमान्लाजानावपाम्यग्नौसमृद्धिकरणंतव॥ममतुभ्यंचसंवननंतदग्निरनुमन्यतामि
यं स्वाहेत्यनेनमंत्रेणांजलिस्थितान्सर्वान्लाजान्जुहोति॥इदमग्नयेनममेतिद्रव्यंत्यजति॥मंत्रत्र
यंकन्यैवपठति॥अथवरः॥कन्यादक्षिणहस्तंसांगुष्ठंगृहीत्वानांगृह्णाति॥गृभ्णामितइत्यासांना
चतुर्णांयाज्ञवल्क्यभारद्वाजाथर्वणप्रजापतिऋ·तत्राद्यानांतयाणांत्रिष्टुप्उष्णिगनुष्टुप्
छंदांसिचतुर्थ्यनुष्टुं·पाणिग्रहणेवि·॥सांगुष्ठंगृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्य
थासः॥भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥अमोहमस्मिसात्वंसात्व
मस्यमोअहम्॥सामाहमस्मिऋक्त्वंद्यौरहंपृथ्वीत्वं॥तावेहिविवहावहैसहरेतोदधावहै॥प्रजां
प्रजनयावहैपुत्रान्विंदावहैबहून्॥तेसंतुजरदष्टयःसंप्रियौरोचिष्णूसुमनस्यमानौ॥पश्येम
शरदःशतंजीवेमशरदःशतं शृणुयामशरदःशतमित्येभिर्मंत्रैरग्नेरुत्तरतोगत्वातत्रवरोवं

प्र॰ग॰त्न

ध्वा दक्षिणपादं सव्यहस्तेन गृहीत्वा दक्षिणेन वा पूर्वोक्तं कुल्पित दृढं दृढु परिकरोति॥ आरोहेयमि
तिमं॰ अथर्व॰ त्रिष्टुव धू॰ ईं॰ अश्मारोहणेवि॰॥ आरोहेममश्मानमश्मेव त्वं स्थिरा भव॥ अभि
तिष्ठ पृतन्यतो बाधस्व पृतनायतः इत्यनेन मंत्रेण॥ अश्मान्यारूढायां कुमार्यां वरो गाथां गा
प्रे२१ यति॥ सरस्वतीमितिमं॰ विश्वावसुकं॰ अनु॰ सरस्वती देव॰ गानेवि॰॥ सरस्वती प्रेदमव सुभगे वा
जिनीवति। यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः॥ यस्यां भूतं समभवद्यस्यां विश्वमिदं
जगत्॥ तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः॥ इत्येतद्द्वंतं॥ अथ वधूवरौ अग्निं प्रदक्षि
णं कुरुतः॥ तुभ्यमग्न इतिमं॰ अथर्व॰ त्रिष्टुप्॰ परिक्रमणेवि॰॥ तुभ्यमग्ने पर्यवहन्सूर्यां वहतु
ना सह॥ पुनः पतिभ्यो जायां दा अग्ने प्रजया सह॥ इत्यनेन वारद्वयपठनेन मंत्रेण॥ एवं लाजादि प
रिक्रमणांतं पुनर्वारद्वयं कर्म कुर्यात्॥ ततस्तृतीयपरिक्रमणांतरं शूर्पकोणेन दृशेन कुमा
र्या भ्राता कुमार्यंजलौ सर्वान् लाजानावपति कुमारी तिष्ठति लाजान् सर्वान् जुहोति॥ भगाय स्वा
हेति मंत्रेण कर्णोपाध्यायस्तु आवपतिद्वयमिव मंत्रं प्रयुंक्ते॥ इदं भगायेति त्यागः॥ समाचारात्
स्त्रीं चतुर्थं परिक्रमणं कुरुतः॥ नेतरथा वृत्तिः॥ त्रिः परिणयंतीति ग्रहणात्॥ तथा चोक्तं परि

भाषायां विहस्ताहस्त्वे तरथा वृत्तिः॥ तथा परिक्रमणं प्रति दंपत्योर्गच्छतोस्तत्र ब्रह्मा स्वाग्नीअं
तरागतिः रेणुः॥ यद्वा चतुर्थपरिक्रमणं वर्जब्रह्म स्वाग्नी अंतरागतिर्भवेत्॥ नैवं विचारयेत्त
नवा चोदितत्वादिति परिभाषासूत्रात्॥ ततः प्रजापतये स्वाहेति प्राजापत्ये होमः॥ इदं प्रजा
पतये न मम॥ अथ वधू उदङ्मुखी परिक्रामयेति वरः॥ एकमिषे स्वादिसप्तपदानां प्रे॰ अ
नु॰ यजु॰ लिंगोक्तदे॰ परिक्रमणेवि॰॥ एकमिषे विष्णुस्त्वा नयत्विति प्रथमं॥ द्वे ऊर्जे विष्णुस्त्वा
नयत्विति द्वितीयं॥ तत्र त्रीणि रायस्पोषाय विष्णुस्त्वा नयत्विति तृतीयं॥ तदग्रेण चत्वारि मा
योभवाय विष्णुस्त्वा नयत्विति चतुर्थं॥ ततः पंच पशुभ्यो विष्णुस्त्वा नयत्विति पंचमं॥ तदग्रे
षड्ऋतुभ्यो विष्णुस्त्वा नयत्विति षष्ठं॥ तदग्रेण सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा
नयत्विति सप्तमं॥ अथ वरस्कंधे स्थाप्योदकुंभादुदकं दक्षिणहस्तेनादाय वधूमूर्द्धन्यभिषिं
चति। आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजं मित्यनेन मंत्रेण। तथैव पु
नरुदकमादाय॥ आपोहिष्ठेत्यादि त्रिऋचस्य सिंधुद्वीप॰ गायत्री॰ आपो दे॰ मूर्द्धन्यभिषेचनेवि॰
आपोहिष्ठेत्यादि आपो जनयथा च न इत्यंतं पठित्वा वधूमूर्द्धनि निषिंचति॥ अथ वरो वधूं सूर्यं

मुदीक्षस्वेतिप्रगासतिसूर्यमुदीक्षते॥तच्चक्षुरितिदध्यङ्ङाथर्वण ऋषिः ब्राह्मीत्रिष्टुप्छंदः सूर्यो
देवता सूर्यावेक्षणे वि॥तच्चक्षुरिति मंत्रेण॥वध्वा एव मंत्रपाठः॥दिवा विवाहे सूर्योदीक्षणं भ
वेत्॥ततो वरो वध्वा दक्षिणस्कंधोपरि दक्षिणहस्तं नीत्वा हृदयमालभेत॥मम व्रते इति मंत्रस्य प्र· त्रि
प्रजापतिर्दे· हृदयालंभने वि·॥मम व्रते ते हृदयं दधामि॥मम चित्तमनु चित्तं ते अस्तु॥मम वाच
मेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमित्यनेन मंत्रेण॥ततो वरो वधूमभिमंत्रयते॥सु
मंगलीरिति मं·प्र· अनुष्टुप् लिंगोक्ता दे· अभिमंत्रणे वि·॥सुमंगलीरियं वधूरिमां समेत प
श्यत॥सौभाग्यमस्यै दत्वायाथास्तं विपरेतनेत्यनेन॥अत्र समाचाराद्वधूवरस्य वामभागे उ
पविश्य॥वध्वासीमंते वरः सिंदूरं ददाति॥ततो अग्नेः प्राच्यां दिशि अनुगुप्त आगारे अनडुहश्चर्म
णि लोहिते प्राग्ग्रीवे उत्तरलोम्नि तां वधूं दृढपुरुषः उत्थाप्योपविशाति॥इह गाव इति मं·प्र· अ·
लिं· उपवेशने वि·॥इह गावो निषीदंत्विहाश्वा इह पूरुषाः॥इहो सहस्रदक्षिणो यज्ञ इह पूषा
निषीदन्त्विति मंत्रेण॥ततः आगत्य पूर्ववद्यथास्थानमुपविश्य ब्रह्मान्वारब्धो वरः अग्नये
स्विष्टकृते स्वाहेति जुहुयात् इदमग्नये स्विष्टकृते इति त्यागं विधाय॥ततः संस्रवप्राशनं पवि

त्राभ्यां मार्जनं। अग्नौ पवित्रप्रतिपत्तिः ब्रह्मणे पूर्णपात्रदानं॥इदं ब्रह्मन् अस्य विवाहहोमकर्म
णः सांगतासिध्यर्थं इदं पूर्णपात्रदानं तुभ्यमहं संप्रददे॥ॐ ब्रह्मा ॐ स्वस्ति स्वक्ता॥द्यौस्त्वा ददा
तु पृथिवी त्वा प्रतिगृह्णातिति पठेत्॥प्रणीताविमोकः॥ततः स्वकीयाचार्याय वरं ददाति॥ये
द्ब्रह्माणो वरः॥ततः आचार्याय गां ददाति॥क्षत्रियश्चेद्ग्रामं वैश्यश्चेदश्वं॥अन्यश्च यथा
शक्ति सुवर्णादिद्रव्यं ब्राह्मणाय दद्यात्॥दश ब्राह्मणभोजनसंकल्पः॥ग्रामवचनं च कुर्युरित्यनेन
यथाकुलमाचरंतीति तिलककरणाक्षतचंदनादिना विप्राशीर्वचनमंत्रपाठादिकं संगृह्यते॥य
था कश्चिद्भ्रात कां कन्यामुद्वहेत् तद्दातस्याः पित्रे रथादिकं गवाश्वातं दत्वोद्वहेत्॥एतेन पुत्रि
कादोषात् मुच्यते॥दिवा विवाहश्चेद्दस्तमिते ध्रुवं दर्शयति रात्रौ चेद्धरद्धाना नंतरं ततो ध्रुवमी
क्षस्वेति वरो वधूं प्रेषयति॥सा च प्रेषिता सति॥ध्रुवमसीति मंत्रस्य प्रजापति ऋषिः पंक्तिश्छं
ध्रुवो दे· ध्रुवावेक्षणे वि·॥ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्
मया पत्या प्रजावती सं जीव शरदः शतमित्यनेन मंत्रेणेक्षते॥वध्वा एव मंत्रपाठः॥सा ध्रुव
मपश्यत् दपश्यामीत्येवं ब्रूयात्॥विवाहादारभ्य त्रिरात्रमक्षारालवणाशिनौ स्याताम् जायाप

प्र·ग·रत्न

पती॥ क्षारं सा जी क्षारादि लवण सैंधवादि रेणुः॥ एकपात्रे सह स्नातः॥ केचित्तु प्रथमेह्नि पर्योर्वर्जं हु
विष्यान्नमिश्रवाचयीति विक्रमः॥ अधःस्वप्नादिरहितो भूनागे कटादि नास्वास्त तेत्रिरात्रमेव शायी
तां॥ विवाहादारभ्य त्रिरात्रमैथुनं उपेयातां॥ अस्मिन्त्रिरात्र पक्ष आश्रियमाणे चतुर्थ्युत्तरकालं
पंचम्यारात्रावभिगमनं कर्तव्यमिति॥ कृतेतत्॥ चतुर्थीकर्मण्यकृते भार्यत्वमेव नाप्यपि संह
तं॥ तस्य विवाहैकदेशत्वाच्चतुर्थीकर्मणः॥ इती श्रीसदाशिवदीक्षितकाशीदीक्षितकृते प्रयोगर
त्ने विवाहप्रयोगः समाप्तः॥ ॥अथ विवाहाच्चतुर्थदिने रात्रौ॥ तत्र नद्यादिसंनवयद्दिन एव वा शि
ष्टाचार परिप्राप्तं वरमात्रे तत्सभायेव ऐरिण्यास्थल कृत्तु दवंशषोडश शूर्पयुत महावंशपात्रदानं
कार्यं कन्यादाता॥ सवस्त्र फलतांबूलदंपत्योर्वंशवर्द्धनं॥ ऐरिण्यारव्यं वंशपात्रं पक्वान्नैः परिपू
रितं॥ करकैरुद्रसंख्याकैः सुवर्णपरिपूरितैः॥ एतावद् ऐरिणी रूपं कन्यं किल सूरिभिः॥ एवं
संपाद्य कन्यादाता सभार्यो देशकालौ स्मृत्वा विवाहस्य संपूर्णफलप्राप्तये वरस्य तत्सित मातृभ्रा
तृभ्यः क्रमेण यथाविभवं पट्टकुलवस्त्रादि दत्वा पुनस्तिथ्यादि कं संकीर्त्य ममोमाहेश्वरीप्रीत्य
र्थं दाराकन्यादानसंपूर्णतायै वंशाभिवृद्धये च ऐरिणीपूजन वरमात्रे ऐरिणीदानं च करिष्ये॥ १

ऐरिणी त्वमुमा देवी महेशो गिरिजापतिः॥ अतस्त्वां पूजयिष्यामि ऐरिणीं सर्वकामदां॥ सवस्त्रां
च सदीपां च शूर्पैः षोडशभिर्युतां॥ वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये॥ इति संकल्प्य॥
मामावंशपात्रे उमामहेश्वरौ षोडशोपचारैः पूजयित्वा वंशपात्रं वरमात्रे दद्यात् मंत्रान्पठेत्॥ १
वंशो वंशकरः श्रेष्ठो वंशो वंशसमुद्भवः॥ अनेन वंशदानेन तुष्टिं वृद्धिं करोतु मे॥ वंशपात्रमिदं
पुण्यं वंशजातिसमुद्भवं॥ वंशानामुत्तमं दानं मतः शांतिं प्रयच्छ मे॥ वंशपात्राणि सर्वाणि मया
संपादितानि वै॥ उमाकांताय दत्तानि मम गोत्राभिवृद्धये॥ वंशो वृद्धिकरं दानं सौभाग्यादिस
मन्वितं॥ वस्त्रेणाच्छादितं पूगीफलहेमसमन्वितं॥ सर्वपापक्षयकरं नानाद्रव्यैश्च पूरितं॥
दानानामुत्तमं दानं मतः शांतिं प्रयच्छ मे॥ ततः वरपितृमातृ संगयोः पृथु गुप्तवेत्रय एष को
प्रार्थयेत्॥ अष्टवर्षा त्वियं कन्या पुत्रवत्सालिता मया॥ इदानीं तव पुत्राय दत्ता स्नेहेन पा१
ल्यतां॥ इति वरमात्राव धृदितसक्षियसुवासिनीभ्यः सकंचुकवस्त्रवंश शूर्पवायनदाना
दिवध्वाकारणीयमिसाचार प्राप्तं यथा देयं॥ इहैव ऐरिणीपूजनादि वधूपितृभ्यामुक्त
कर्ष्यां कृत्वा भोजनं कार्यं॥ ॥इति प्रयोगरत्ने ऐरिणीपूजाविधिः॥ अथ चतुर्थीकर्मो

प्र·ग·त्र शिखीनामाग्नि २

ध्यते॥ विवाहादिवसाच्चतुर्थदिनस्यापररात्रे स्नानं कृत्वा गृहमध्ये पंचभूसंस्कारान्कृत्वा॥
विवाहाग्नेः स्थापनं वरः कुर्यात्॥ ततो वधूर्वरो पश्चादग्नेरुपविशतः दक्षिणतो वधूः उत्तर
तो वरः। ततः प्राणानायम्य देशकालौ स्मृत्वा विवाहांगं चतुर्थीकर्माहं करिष्य इति संकल्प्य भूतं ३
कृत्वा वैकल्पिकावधारणं करोति॥ पूर्ववद्ब्रह्मणो गमनं॥ उत्तरेण पात्रासादनं। द्वे पवित्रे॥
ताम्रमयी आज्यस्थाली। ताम्रमयी चरुस्थाली। पालाशाः समिधः। प्राचावाघारौ। समिधत
मे। आज्यभागौ। पूर्णपात्रं दक्षिणा। एतान्वैकल्पिकान्पदार्थानहं करिष्ये॥ ततो देवतानिध्या
नं॥ तत्र प्रजापतिं। इन्द्रं। अग्निं। सोमं। आज्येन। अग्निं। वायुं। सूर्यं। चंद्रं। गंधर्वं। आज्येनाहं
यक्ष्ये॥ प्रजापतिं। वरुणं। शेषेण स्विष्टकृतं। अ· वा·ः अग्नीवरुणावग्नीवरुणौ। अग्निं वरुणं स्म·५
सवितारं। एताः अंगप्रधानार्थाः देवताः चतुर्थीकर्मण्यहं यक्ष्ये॥ ततो ब्रह्मवरणं॥ अमुकश
र्मन् चतुर्थीकर्मणि त्वं ब्रह्मा भव। भवामीत्युक्त्वा ब्रह्मा स्वासने उपविशेत्। ततः प्रणीतास्था
नादुत्तरतो वारीपूर्णमुदकपात्रं न्यसेत् ततः उदपात्रोऽग्न्योर्मध्ये प्रणीताप्रणयनं॥ परिस्तरणा ६१
द्याज्यभागांतं पूर्ववत्। अग्ने प्रायश्चित्ते त्वं इत्यादीनां परमेष्ठी ऋ· त्रिष्टु· लिंगोक्ता दे· होमे वि·॥

४ विष्णुः विश्वान्देवान्मरुतः स्वर्कान्॥ वरुणमादित्यादितिं प्रजापतिं आज्येन॥

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पति
घ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदमग्नये न मम॥ उदपात्रे संस्रवप्रक्षेपः॥ वायो प्रायश्चित्ते·
यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं वायवे न·। सूर्य प्रायश्चित्ते· यास्यै पशुघ्नी
तनूस्तामस्यै नाशय स्वाहा। इदं सूर्याय न·॥ चंद्र प्रायश्चित्ते· यास्यै गृहघ्नी तनूस्तामस्यै
नाशय स्वाहा। इदं चंद्रमसे न·॥ गंधर्व प्रायश्चित्ते· यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वा
हा। इदं गंधर्वाय न मम॥ एवमाज्येन होमं कृत्वा स्थालीपाकेन प्रजापतय इति मेधातिथि
ऋ· अनुष्टुप्· प्रजापतिर्देवता होमे वि·॥ प्रजापतये स्वाहा। इदं प्रजापतये न मम॥ अग्न
स्त य इत्यादीनां प्रजापसंतानां षमाहुतीनामुदपात्रे संस्रवं क्षिपेत्॥ ततोऽग्नये स्विष्टकृते स्वाहा
के चिदु स्विष्टकृतेऽपि संस्रवमुदपात्रे क्षिपंति॥ इदमग्नये स्विष्टकृते न मम॥ भूर्भुवस्वरिति
महाव्याहृती प्रजा· ऋ· मेयागायत्र्युष्णिगनुष्टुप् छंदांसि अग्निर्वायुसूर्या दे· होमे वि·॥
भूः स्वाहा। इदमग्नये न· भुवः स्वाहा। इदं वा· स्वः स्वाहा। इदं सू· त्वन्नो अग्न इति वामदे· त्रि·
अग्निवरुणौ दे· होमे· त्वन्नो अग्ने· इदमग्नीवरुणाभ्यां· स त्वन्नो अग्न इति वामदे· त्रि·

अग्नीवरुणयोरिदं॰ होमे वि॰॥ स त्वन्नो अग्ने॰ एधि स्वाहा इदमग्नीवरुणाभ्यां॰ अयाश्चाग्नेर
तिवा॰ बृहतीछंदः॰ अग्निर्दे॰ हो॰। अयाश्चाग्ने॰ जु॰ स्वाहा इदमग्नये अयसे न॰॥ एते शत
तमिति वामदे॰ त्रिष्टुप्॰ वरुणः सविता विष्णुर्विश्वेदेवा मरुतस्स्वर्का देवता होमे वि॰॥ ये ते
शतं॰ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न॰॥ उदुत्तममिति
शुनःशेप ऋ॰ त्रि॰ वरुणोदे॰ हो॰ उदुत्तमं॰ स्याम स्वाहा इदं वरुणायादि॰ प्रजापतये स्वाहा इ
दं प्र॰। ततः संस्रवप्राशनं पवित्राभ्यां मार्जनं। पवित्रः प्रतिपत्तिः। ब्रह्मणे पूर्णपात्रदानं।
प्रणीताविमोकः॥ ततः उदपात्रादुदकमादाय। वध्वा मूर्द्धन्यभिषिंचति॥ या ते इति मंत्र॰
प्रजा॰ त्रिष्टुप्॰ वधूर्दे॰ अभिषेचने वि॰॥ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी
निंदिता तनूर्जारघ्नीं ततएनां करोमि सा जीर्य त्वं मया सह॰ समुकी देवी त्यनेन॰॥ अथ वधू
वरौ स्थालीपाकं हुतशेषं प्राश्नीत इति सूत्र॥ प्राणैस्ते इति मंत्रस्य प्रजाप॰ यजुः॰ वधूर्दे
व॰ स्थालीपाकस्य शेषप्राशने वि॰॥ प्राणैस्ते प्राणान् संदधाम्यस्थिभिरस्थीनि मांसैर्मां
सानि त्वचा त्वचमित्यनेन मंत्रेण॥ स च न तं मंत्रं पठति ते प्राश्नाति॥ ततो वधूः श्रुधमर्थमा

६२

चरेत्॥ ततः आवसथ्याधानं चेत्करोति तदा आवसथ्याधानं कुर्यात्॥ ॥ इति प्रयोगरत्ने
चतुर्थीकर्मप्रयोगः समाप्तः॥ ॥ अथ देवकोत्थापनमंडपोद्वासनविधिः॥ तत्र कालः॥
समे च दिवसे कुर्याद्देवकोत्थापनं बुधः॥ षष्ठे च विषमे नेष्टं मुक्त्वा पंचमसप्तमौ॥ समेषु ष
ष्ठं विषमे पंचमाससमारिति कं न नात्रे षष्ठमित्यर्थः॥ उक्ते काले मंडपांतः सपत्नीकः स्वासने
स्थापितदेवतानामुत्थापनं मंडपोद्वासनं पुण्याहवाचनं करिष्ये। तिसंकल्प्य सर्वा देवताः
प्रसह्य वस्त्र जयित्वा उत्तिष्ठ ब्रह्मणस्पते॰ उत्थापयेत्। यांतु देवगणाः सर्वे पूजामादाय भूतला
त्॥ इष्टकामं च विपुलं दत्वा पुनरागमनाय च॥ इति विसृज्य॥ भगवत्यादीनां मंडपांतस्तैलाभ्यंग
गोद्वर्तनो स्नोदकस्नानानि कारयित्वा वेष्टनस्रक्षमुन्मुच्य स्वस्तिवाचनं कुर्यात्॥ ततो द्विजै
रभिषेकः कार्यः॥ अभिषेकांते पुरोधास्तच्छादिवशापात्रे निधाय तदुपरि प्रदक्षिणाभिर्जलं
सकुंकुंबं यजमानशिरसि किंचिच्छ्रावयेत्॥ देवस्य त्वा सोमस्य त्वा पालाशां भवति श्रासणं पठे
त्॥ ततः कर्तासिरसि बद्धांजलिरस्मद्वेषपूर्वं सुषष्ठे सुमासेषु शोभनमस्तु अस्तु शोभनं त्रिः॥
द्विजान्प्रार्थयेत्॥ तच्च तथास्त्वीति ब्रूयुः॥ ततो द्विजाश्च दनता वल दक्षिणादिना पूजयित्वा॰

प्र·ग·ल

तदाशिषो मंत्रोक्ताः ग्रहीयादित्यादि देशकुलाचारानुसारेण ज्ञेयं॥ ॥इति प्रयोगरत्ने देव
कस्थापनविधिः समाप्तम्॥ ॥अथ वध्वाः प्रथमगृहप्रवेशः॥ ॥वधूप्रवेशः प्रथमेऽब्दे तृती॰
ये शुभप्रदः॥ पंचमके थवा द्वितीयके वाथ चतुर्थके वा षष्ठे वियोगाभयः दुःखदः स्मृत॥ ल
ल्लः॥ स्वनवनपुरप्रवेशे देशानीतथोद्वाहे॥ नववध्वागृहगमने प्रतिशुक्रविचारणा नास्ति॥
मांडव्यः॥ नित्ययाने गृहे जीर्णे प्राशने तेषु सत्सु॥ वधूप्रवेशमांगल्ये न मौढ्यं गुरुशुक्र
योः॥ ज्योतिःप्रकाशे॥ वामेऽभ्युक्रे न वोढा यात्स्कवे धर्मयं दृक्सु सुखेऽभ्यगो॥ तदेव विबुध॰
धैर्ज्ञेयं कवलं तु द्विरागमे॥ पूर्वतोऽभ्युदिते शुक्रेऽप्रपायाद्दक्षिणापरे॥ पश्चादभ्युदिते चैव
यायात्पूर्वोत्तरादिशः॥ तथा भाद्रपदमारभ्य पूर्वादिशमुखं दिक्षु पतिदिशं मासत्रयं कपाटं ज्ञे॰
यं॥ चैत्रमासारभ्य पूर्वा घष्ठ दिक्षु मुख्यदिशि मासद्वयं विदिक्ष्येकं मासं संक्रमणे कपा
टं जानीयात्॥ इदं द्वयं ग्रामांतरेण नववधूगमने वर्जं नियतकालेऽपि कदाचिन्निषेधमा
ह गर्गः॥ व्यतीपाते च संक्रांतौ ग्रहणे वैधृतावपि॥ श्राद्धं विना शुभं नैव प्राप्तकालेऽपि मा
नवः॥ तथा॥ अमासंक्रांतिविष्ट्यादौ प्राप्तकालेऽपि नाचरेदिति॥ आ नो भद्राः॥ स्वस्ति

६३

नइन्द्र इति वधूगृहप्रवेशः सवधूको वरो गणपतिं लक्ष्मीं च यथाचारं संपूज्य॥
पुण्याहवाचनं कारयित्वा विप्राशिषो गृह्णीयात्॥ विवाहात्प्रथमे पौषे आषाढे चा॰
धिमासके॥ भर्तृगृहे वसेन्न स्त्री चैत्रे तातगृहे तथा॥ ॥इति प्रयोगरत्ने वधूगृ
हगमनविधिः॥ ॥अथ विवाहे आशौचादिनिर्णयः॥ ॥विधिवत्कृते कन्यावरणे त्रिरा
त्रे दिनत्रसासि पर्यंतं मध्ये आशौचं प्राप्तौ रुद्रयोः सद्यः॥ आशौचं चंद्रिकाकारा आह॥ त
त्र याज्ञवल्क्यः॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे॥ आपद्यपि च कष्टायां सद्यः शौ
चं विधीयत इति॥ दत्ता तावुर्वस्पर कन्यायाश्च सद्यः शौचं विवादेऽस्यर्थः॥ बृहस्पतिः॥
विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके॥ पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः॥ शु
द्धिः शम्भुतौ॥ विवाहोत्सवयज्ञेषु त्वंतरेऽमृतसूतके॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः॥
विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूत
कं॥ प्रारंभश्चात्रैवोक्तः॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥ नांदीमुखं विवाहा॰
दौ श्राद्धे पाकपरिक्रियेति॥ नांदीमुखानंतरं धिश्चावश्यकत्वे प्रतिषेधउक्तः॥ एक विरा

प्र॰ग॰त्न

शास्त्रद्वयोक्ते विवाहे दश वासराः॥ त्रिरात्रं चौलोपनयने नांदीश्राद्धं विधीयते॥ इति॥ तेन एकविं
शत्साधारणं तः॥ पाणिग्रहणं यथावल्लादि भवति तथा अवश्यके यत्ताद्दौ पूर्वं श्राद्धं कुर्यादित्यर्थः॥
प्रारंभाभावे पि कन्याया अभार्यत्वे सपत्नीत्वे तल्लग्नांतराभावे च होमादि पूर्वकं विष्णुरनु
लामाह॥ आतरब्ध विशुध्यर्थं कूष्मांडैर्जुहुयाद्धुतं॥ गां दद्यात्संचगव्यां शीततः शुध्यति सू
तकिति॥ उपकल्पितसंभारस्यासन्निहितलग्नांतराभावेन संभारण्याधारणाशक्तौ आ
शौचाभावमाह॥ विष्णुः॥ न देव प्रतिष्ठा विवाहयोः पूर्वसंभृतयोरिति॥ अथ विवाहकाले
कन्या ऋतुमती चेत्तत्राह यज्ञपार्श्वः॥ विवाहे वितते तंत्रे होमकाल उपस्थिते॥ कन्या ऋतु
मती दृश्या कथं कुर्वंति याज्ञिकाः॥ स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि॥ युजानमा
हुतीं हुत्वा ततः कर्म नियोजयेत्॥ यद्वा॥ विवाहे होमप्रक्रांते यदि कन्या रजस्वला॥ त्रिरात्रं
दंपती नाचरेत् पृथक् शय्यासनाशनौ॥ चतुर्थेह्नि स्नातौ च तस्मिन्नग्नौ यथाविधीति जुहुता
मिति शेषः॥ इति विवाहे आशौचनिर्णयः॥ अथ प्रसंगात्पुनर्विवाह उच्यते॥ कृते विवाहे पं ६७
चांगशुद्धिरहित्यादिदोषश्चेत्॥ ज्ञाततद्धा ज्योतिःशास्त्रोक्तकालविशेषे पुनर्विवाहः कार्यः॥

नदारहन्त्सिंहः॥ श्रीधरीये॥ पुनर्विवाहं वक्ष्यामि दंपत्योः शुभवृद्धिदं॥ लग्नेन्दु लग्नयोर्दोष
ग्रहतारादिसंभवे॥ अन्येष्वशुभकालेषु दुष्टयोगादिसंभवे॥ विवाहे चापि दंपत्योरशौ
चादिसमुद्भवे॥ तस्य दोषस्य शांत्यर्थं पुनर्विवाह इष्यते॥ अयनं चोत्तरं श्रेष्ठं वर्ज्येत्तु वि
शेषतः॥ आषाढमार्गशीर्षौ द्वौ वर्ज्यौ शेषाः शुभावहाः॥ विवाहोक्तक्षतिथ्यंशराशिवारादि व
र्जिताः॥ करणं योगसंज्ञा निग्रहगोचरयोगकाः॥ तस्मिन्विवाहसमये शुभेदाः स्युस्तथैव हि॥
पूर्वाह्ने पूर्वरात्रे च विवाहः शुभदो भवेदिति॥ अथ द्वितीयादिविवाहविधिः॥ तत्राधिवेदनीया
आह याज्ञवल्क्यः॥ सुरापि व्याधिता धूर्ता वंध्यार्थघ्न्य प्रियंवदा॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरु
षद्वेषिणी तथा॥ अधिविन्ना तु भर्तव्या महदेनोन्यथा भवेत्॥ अधिवेत्तव्या तदुपरि स्त्र्यंतरं
कर्तव्यमित्यर्थः॥ आपस्तंबः॥ धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतेति॥ अधिवेदने प्रतिक्षा
कालमनुराह॥ वंध्याष्टमेधिवेत्तव्या दशमे तु मृतप्रजा॥ एकादशे स्त्रीजननी सद्यस्त्वप्रियं
वादिनीति॥ संग्रहे तु॥ अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्॥ मृतप्रजां पंचदशे सद्य
स्त्वप्रियवादिनीति॥ उत्सर्थे तु विवाहांतरे विशेषः॥ एकामुक्तेन्यकामार्थमन्यां लब्धुं य इच्छति॥

समर्थः स्तोषयित्वार्थं पूर्वोदापरमावदेत ॥ याज्ञवल्क्यस्तु ॥ आज्ञासंपादिनीं दक्षां वीर
सूं प्रियवादिनीं ॥ त्यजेन्नाप्यस्तृतीयांशमं दद्याभरणं स्त्रियः ॥ सधनो धनं तृतीयांशम
धनो ग्रासाच्छादनासमर्कभरणं दाप्यरस्त्यर्थः ॥ या त्वेतावतापरितुष्टा गृहान्निर्गच्छेत्तां प्रत्या
ह अत्रुः ॥ अधिविन्नातु यानारी निर्गच्छेद्रोषिता गृहात् ॥ सा सद्यः संनिरोद्धव्या त्याज्या वा
कुलसन्निधाविति ॥ बहुभार्याज्येष्ठयैव सह धर्मं सपत्नीकसाध्यं कुर्यादिति हेमाद्रौ ॥
कात्यायनः ॥ अग्निशिष्टादिशुश्रूषा बहुभार्याः सवर्णया ॥ कारयेत्तद्बहुत्वं च ज्येष्ठया ग
र्हितानयेदिति ॥ शिशुश्रूषा ॥ अतिथ्यादिपूजा ॥ सा च पत्नीसंपाद्या धर्मं मात्रोपलक्षणार्
थो गर्हिता धर्मायोग्यत्वाथादितिदोषवत्त्वेन चेदित्यर्थः ॥ तादृशी चेतन्न याकित्वनेवंवि
धायकनिष्ठ्यापि कारयेत् ॥ याज्ञवल्क्यः ॥ सत्यामन्यासवर्णायां धर्मकार्यं न कारयेत् ॥
सवर्णासु विधौ धर्मे ज्येष्ठया विननेतरा ॥ अन्या मसवर्णायं चाधाने सहाधिकृतानें
व भार्याविषयं ॥ अनधिकृतायास्तु प्रसक्त्यभावात् ॥ तत्रापि केवलकृत्वमसावेक्ष
णादियजमानो दुंबरीसमनवद्दत्केयैव सवर्णायां ज्येष्ठया कारयेत् ॥ सपत्नीसहन्न

हनादितु कर्तृसंस्कारकसहाधिकृताभिः सर्वाभिरित्यादि मिमांसल मनसु ज्ञानं ॥ स्मार्ताग्नि
साध्येतु कर्मणि सर्वासां सहाधिकारः ॥ प्रथमविवाहाग्नावेव परविवाहहोमविधिनातदसं
भवे ग्निद्वयं संसर्गविधिना च ॥ अतस्तत्राप्युक्त एव कर्मसु विवेकः ॥ द्वितीयादिविवाहोग्निनि
यमाह कात्यायनः ॥ सदारोन्युदारानुद्धोढं कारणांतरात् ॥ यदिच्छेदग्निमाकुर्वन्क्व होमस्य
विधियते स्वगत्राववभवे होमो लौकीके न कचनेति अयं नियमः संनुवे ॥ ग्रामांतरादावसं
भवेतु लौकिकाग्नौ हत्वा तदनंतरमं उनाधुक्तप्रकारेण पुनराधानं कार्यं ॥ अत्र द्वितीयादिवि
वाहे जीवत्पितृकोपि स्वयमेव नांदीश्राद्धं कुर्यात् ॥ नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः ॥
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकमिति स्मृतिः ॥ तत्र पितृवर्गे द्विहायमातृमातामहव
र्गयोः कुर्यात् ॥ मातरी जीवंत्यां मातावर्गस्यैव तस्मिन्नपि जीवती द्वारलोपात् ॥ वृद्धिश्राद्धलोप
एव ॥ सोपि साग्निकश्चेयेभ्यः पिता दद्यात्तेभ्यः स्वयमपि दद्यात् ॥ एभ्य एव पिता दद्यात्तेभ्यः कु
र्वीत साग्निक इति वचनात् ॥ अन्ये तु असाग्निकोपि पितृदेवताभ्यो दद्यात् ॥ न तु लोपः ॥ वृद्धौ
तीर्थे च सन्यस्ते तते च पतिते सति ॥ एभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति मैत्रायणी

प्र॰ग॰त्न

परिशिष्टाधारः॥ द्वितीयादिविवाहे कालविशेष उक्तः॥ प्रमदामृतवासरादितिः पुनरुद्वाहवि
धिर्वस्य च॥ पौषमे परिवत्सरेषु गोषु गले चाप्यमृतिप्रशो भवेत्॥ जीवत्सां तु पूर्वपत्न्यां द्विती
यादिविवाहे नायं कालनियमः॥ अथ तृतीयमनुषीविवाहस्य निषिद्धत्वात्तस्मिन्कर्तव्ये
अर्के विवाहविधिः॥ तृतीयनिषेधमाह मात्स्यकश्यपः॥ तृतीयं मनुषीं चैव चतुर्थीं यः समुद्व
हेत्॥ पुत्रपौत्रादिसंपन्नकुटुंबी साग्निको वरः॥ उद्वहेदिति सिध्यर्थं तृतीयां न कदाचन॥
मोहतज्ञानतो वापि यद्विगच्छेतु मानुषीं॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथा॥ अन्यत्रा
पि॥ तृतीयां यद्विचोद्वाहेत् दर्शसाविधवा भवेत्॥ संग्रहे॥ चतुर्थ्यादिविवाहार्थं तृतीयेर्कं स
मुद्वहेत्॥ आदित्यदिवसे वापि हस्तर्क्षे चा शनैश्चरे॥ शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकः॥
देशादि ब्रह्मपुराणे दर्शितं॥ ग्रामात्प्राच्यामुदीच्यां वा सुपुष्पफलसंयुतं॥ परीक्ष्य यत्नतो ध
र्त्ता स्वगृह्योक्तिलोदि यथाविधिः॥ व्यासः॥ स्नात्वालंकृतवासास्तु रक्तगंधादिभूषितं॥ सुपुष्पफ
लशाखैश्च कमेगुल्मं समाश्रयेत्॥ सुलक्षणेन संयुक्तमर्कं संस्थाप्य यत्नतः॥ अर्ककन्यां
प्रदानार्थमाचार्यं कल्पयेत्सुरा॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥ नांदीश्राद्धं दिर

व्येन अष्टवर्गांश्च पूजयेत्॥ पूजयेन्मधुपर्केण वरविप्रस्य हस्ततः॥ यज्ञोपवीतं वस्त्रं च रु
स्तकर्णादिभूषणं॥ उष्णीषेण गंधमाल्यादि वरायास्मै प्रदापयेत्॥ स्वशाखोक्तविधानेन म
धुपर्कं समाचरेत्॥ ब्रह्मपुराणे॥ यथाविधिवदस्यानंतरं॥ उक्तोर्कपुरतस्तिष्ठन्प्रार्थये
त् द्विजोत्तमः॥ त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे॥ तृतीयोद्वाहजं दोषं निवा
रय सुखं कुरु॥ तत्र ध्यात्वाप्यर्कदेवेशं छायया सहितं दिवां॥ वस्त्रैर्माल्यैस्तथा गंधैस्तन्मंत्रैरे
वै पूजयेत्॥ तन्मंत्रा पाठकृष्णेनेत्यादिना अन्यत्रापि श्वेतवस्त्रेण संवेष्ट्य कार्पासतंतुभिः॥
गंधपुष्पैः समभ्यर्च्य तल्लिंगैरभिषिंचयेत्॥ गुडौदनं तु नैवेद्यं तांबूलं च समर्पयेत्॥ व्यासः॥ अर्क
प्रदक्षिणं कुर्वन् जपेन्मंत्रमिमं बुधः॥ मम प्रीतिकरा येयं मया सृष्टा पुरातनी॥ अर्कजा ब्रह्मणा सृ
ष्टा अस्माकं प्रीतिरक्षतु॥ पुनः प्रदक्षिणीकृत्य मंत्रेणानेन मंत्रवित्॥ नमस्ते मंगले देवी नमः स
वितुरात्मजे॥ त्राहि मां कृपया देवी पत्नी त्वं मे इहागता॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिता
य च॥ वृक्षाणामादिभूत त्वं देवानां प्रियवर्द्धनः॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥
ततश्च कन्यावरयोस्त्रिपुरुषकुलमुच्चरेत्॥ आदित्यः सविता चार्कः पुत्रपौत्रीबसुपत्रिका॥

प्र॰ग॰त्न

गोत्रं काश्यपं इत्युक्त्वा लोके लौकिकमाचरेत्॥ सुमुहूर्त्तेक्षणं निरीक्ष्येत स्वस्तिसूक्तमुदीरयेत्॥
आशिभिः सहितः कुर्याद् आचार्यप्रमुखद्विजैः॥ अथाचार्यं समाहूय विधिना तन्मुखाच्च तां॥
परिगृह्य ततो होमं गृह्योक्तविधिनाचरेत्॥ आचार्यस्य दानमंत्रमाह॥ व्यासः॥ अर्ककन्या
मिमां विप्र यथाशक्ति विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति॥ अंजल्यक्षि
तकर्माणि कृत्वार्कं कपार्श्वके॥ यावत्संचारितं सूत्रं तावतार्कं प्रवेष्टये॥ स्वशाखोक्तेन मंत्रेण
गायत्र्या वाथवा नयेत्॥ पंचीकृत्य पुनः सूत्रं स्कंधे बध्नामि मंत्रतः॥ बृहत्सामेति मंत्रेणास्
त्ररक्षां प्रकल्पयेत्॥ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा॥ कुंभांश्च निक्षिपेत्स्थ्याशाग्ने
यादिचतुष्टये॥ सवस्त्रं प्रतिकुंभं च त्रिःसूत्रेणैव वेष्टयेत्॥ हरिद्रागंधसंयुक्तं पूरयेच्छीतलं
जलं॥ प्रतिकुंभमहाविष्णुं संपूज्य परमेश्वरं॥ पाद्यादिनी च नैवेद्यं कुर्यान्नाम्नैव मंत्रवित्॥
अत्र होमप्रकारः॥ शौनकेन दर्शितः॥ तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु॥ अर्कविवा
हं वक्ष्यामि शौनकोहं विधानतः॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादिवाचयेत्॥ नांदीश्राद्धं प्र
कुर्वीत स्थंडिलं च प्रकल्पयेत्॥ अर्कमभ्यर्च्य सौर्यां च गंधपुष्पाक्षतादिभिः॥ सौर्याय सूर्यदैव

६७

सया आकृष्णेनेत्यादिकृचा॥ स्वयं चालंकृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः॥ अर्कस्योत्तरदेशे
समन्वारब्ध एव या॥ एतयार्ककन्यया॥ उल्लेखनादिकं कुर्यादाघारांतमतः परं॥ आज्याहुतीं
च जुहुयात्तत्संगोभिरनएवया॥ यस्मै त्वा काम कामाय स्वनया चातः परं॥ व्यस्ताभिश्च स
मस्ताभिस्तत स्विष्टकृद्भवेत्॥ परिवेषणपर्यंतमयाश्चेत्यादिकमात॥ प्रार्थनामंत्रादि

क

विशेषमाह॥ व्यासः॥ पुनः प्रदक्षिणीकृत्वा मंत्रमेतमुदीरयेत्॥ मयाकृतमिदं मर्कस्त्री
वरेषु जरायुषा॥ अर्कपत्न्यानिनो देहि तत्सर्वं क्षंतुमर्हसि॥ इत्युक्त्वा शांति सूक्तानि
तस्यार्थे विसृजेत्पुनः॥ गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः॥ इतरेभ्योपि विप्रेभ्यो
दक्षिणामपि शक्तितः॥ तत्सर्वं गुरवे दद्यात्तेपुण्याहमाचरेत्॥ अत्र पंचमदिने कर्तव्यमुक्तं
॥ब्रह्मपुराणे॥ चतुर्थदिवसे तीते पूर्ववत्तां प्रपूजयेत्॥ विसृज्य होममग्निं तु विधिना मानुषी
परां॥ उद्वहेदन्यथा नैव पुत्रपौत्राभिवृद्धिमान्॥ न पश्येत्तं च मित्रापि मंगलैर्वै गच्छति॥ एवमे
वद्विजश्रेष्ठ विधिना संप्रवर्द्धते॥ धनधान्यसमृद्धिं च उदारा कीर्तिपरं व्रजेत्॥ अथ सं
क्षेपतः प्रयोगः॥ उक्त आदित्यवारादौ उक्तदेशे यथोक्तार्थं समीपे गत्वाचम्य प्राणानायम्य

ने ३

प्र॰ग॰र॰

दिनांदीश्राद्धांतार २ वाग्दानंकृत्वावरस्यमधुपर्कंकृत्वा ततःपटंधृत्वास्वस्तिवाचन १

देशकालौस्मृत्वासंकीर्त्यममतृतीयमानुषीविवाहजदोषभावार्थमर्कविवाहंकरिष्ये॥आ
चार्यवर्णस्वस्तिवाचनांघुक्तक्रमेणकुर्यात्॥तत्रहोमविशेषः॥देशकालादिसंकीर्त्यार्
मर्कविवाहांगभूतहोमंकरिष्ये॥तत्रपूर्वेणब्रह्मणोगमनं।उत्तरेणपात्रासादनं।द्वेप
वित्रे।ताम्रमयीआज्यस्थाली॥पालाशाःसमिधः।प्रांचावाघारौ।समिधन्तमे।अज्यभागौ
प्रणीपात्रं।दक्षिणा।देवताभिध्यानेविशेषः।प्र॰।इं॰।सो॰।अ॰।प्रधानं॰बृहस्पतिं।अ॰वा॰
स्व॰।प्रजापतिंचाज्येन।शेषेणस्विष्टकृतं।इत्यादि॥आघारांतंःकृत्वा॥संगोभिरांगिरसस्य।
अंगिरसऋषिः त्रिष्टुप्॰बृहस्पतिर्दे॰अर्कविवाहांगभूतेआज्याहुतिहोमेवि॰॥ॐसंगो
भिरांगिरसोनक्षमाणभगइवेदर्यमाणंनिनाय॥जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाज
याशूरिवाजोस्वाहा॥इदंबृहस्पतेनमम।त्यागः॥यस्मैत्वेतिमंत्रस्यवामदेवऋ॰त्रि॰अग्नि
देव॰होमेवि॰सर्वत्रपूर्ववत्।यस्मैत्वाकामकामयत्स्वयंसम्राज्याजामहे॥तमद्यमन्यंकाम
दत्वायेदंखंघृतंपिबस्वाहा॥इदमग्नयेनमम॥ततोव्यस्तसमस्ताभिर्व्याहृतिभिर्हुत्वाहोमशे
षंसमापयेत्॥ततःप्रदक्षिणंप्रार्थनादिकर्मशेषसमापः॥ ॥इतीश्रीसदाशिवदीक्षितेका

३॥मंत्रमुक्त्वादक्षिणांदद्यात्॥ततोगायत्र्यावेष्टितसूत्रेणबहस्तेमेतिमंत्रेणकंकणंबध्वार्कस्यचतुर्दिक्ष
॥कुंभेषुविष्णुसंपूज्य अग्निंप्रतिष्ठाप्यआघारांतेसंगोभिरितिमंत्रद्वयोद्दृति॥ २

माणो

१४

शीदीक्षितकृतेप्रयोगरत्नेअर्कविवाहविधिःसमाप्तः॥ ॥ग्रंथाननेकानालोक्यविचा
र्यसदसच्चयः॥कृतश्रमेस्तेनविभुःशंकरःप्रीयतांमम॥३॥भूयोगंथविचार्यचंचलमनसा
ग्रंथेमयानिर्मितेनांस्यर्थ्यादुदसादरंग्रहविधोसंतोगुणग्राहिणः॥येस्तिष्वंमिदमत्रमू
र्खमुखरास्तेषामशक्यार्थनाप्यर्थाव्याःपरदोषदत्तमनसानिर्दोषदोषेक्षिणां॥२॥ग्रंथे
स्मिन्गुणागणावत्वमुच्यतेचेत्स्वयंसादीनगुणावेतस्याप्रकोपे॥तत्संतंसिरसिक्तांजलि
स्तयाचेशोधयंतुस्मादोदितंमयाप्यत॥३॥ ॥इतिश्रीसदाशिवदीक्षितसुतकाशी
दीक्षितकृतेप्रयोगरत्नेसमाप्तः॥ ॥दंडोपवीताजिनमेखलानांलोपेघृतस्माहुतिभिर्हु
नेत्सः॥प्राणायमंत्र्यात्रियुगांस्तकृत्वातान्धारयेत्सद्विधिवत्सुक्तान्॥१॥उपवीतादि
नाशेस्यात्मनोज्योतिरिदाहुतिः॥संध्याग्निकार्यलोपेवास्नात्वाष्टोत्तरंसहस्रकं॥२॥का
लिपुराणे॥द्विभार्यस्यमृतेपुंसस्तृतीयांकुरुतेयदि॥चतुर्थंयदिकुर्यात्तुनचेत्कुर्याद्विधानं
के॥३॥यदात्वर्कविवाहापिकार्यंनावः॥तदेनांरूचपरित्यज्यविवाहसमयेपाठाचारेब्रह्म
यज्ञादौअपरित्यागः॥यदाशीलादिबद्र्यादिविवाहस्तदापीयमेवासाहंकठनीयंशार

रणेक

स्व

ह्य

प्रेम्णाधिक

सकलमि

प्रतोदेहं द्वं वत्॥ यदि जीवपत्नीकस्तृतीयां परिणयति॥ तदा बदरीमातुलिंगीदाडिमीधा
त्रीएतासु सर्वासु मध्ये कया वि एकया सह विधानं कर्तव्यं॥ न त्वर्कया सहेति निश्चयः॥ ए
वं विधाने तु भार्याक्षेमं च विंदति॥ ॥ इति श्रीसदाशिवदीक्षितसुतकाशीदीक्षितकृत प्र
योगरत्न ग्रंथसमाप्तः॥ ॥ ॥ शुभं भवतु॥

[OrderDescription]
,CREATED=17.09.19 11:22
,TRANSFERRED=2019/09/17 at 11:44:26
,PAGES=71
,TYPE=STD
,NAME=S0001869
,Book Name=M-648-PRAYOG RATAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,